This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit. The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 1951 विषय कर्मकाण्ड
नाव. कात्यायनसूत्र (भाष्यसहितम्) (द्वितीयोध्याय)
लेखक/लिपीकार दैवयाज्ञिक देवकृत
पृष्ठ 47 काळ संवत 1833 [✓ पूर्ण]/~~अपूर्ण~~

देवयाज्ञीक कृत श्रौतसूत्रम
भाष्यम् ४ अध्याय

श्रीगणेशाय नमः॥ रुद्याणां एवं सकर्मकेषु योगेष्वपवर्गे निरूपितेऽधुना तत्राधिकारी निरूप्यते। तत्राधिकारो नाम फलभोक्तृत्वसमानाधिकरणं कर्तृत्वं। श्राद्धादौ पित्रादेरृत्विजां चाधिकारापत्तेरर्थविशेषणद्वयं· न चैवं जातेष्टौ पितुः फलभोगाभावादधिकारानापत्तिः स्वस्वप्रकरणोक्तस्वत्वापेक्षणस्य पूतत्वादिफलकत्वेन पापक्षयफलकत्वाधावारित्वि वाच्यं। प्रवृत्तिप्रयोजकफलेच्छासमानाधिकरणकर्तृत्वस्यैव विवक्षितत्वात्· जातेष्टिश्राद्धादावपि फलस्यात्मनिष्ठत्वे पितरिच्छाया यजमाननिष्ठत्वादधिकाराविघातः। ऋत्विजामपि यजमानस्य फले भूयादितीच्छायाः ष्ठकर्तृत्वसमानाधिकरणत्वादधिकारापत्तिरतः प्रवृत्तीत्युक्तं दक्षिणाप्राप्तिर्मे भूयादितीच्छाया एवं ऋत्वि प्रवृत्तिजनकत्वेऽप्युक्तविधेच्छायाः प्रवृत्तिप्रयोजकत्वाभावात्। अयं चाधिकारो विध्याक्षिप्तस्वेष्टसाधनत्वस नाधिकरणस्वकृतिसाध्यत्वबललभ्यत्वाद्विधिप्रमाणकः। अयमेव चाधिकारविधिरित्युच्यते· तत्र चाधिकारस्येष्टरूपप्रवृत्तिफलघटितत्वात्तदेवेष्टरूपं फलं भावनायामपेक्षितत्वेनेति प्रथमं विचार्यते। तत्र भावनायां भाव्यापेक्षायां परक्रत्वाधानत्वस्यैव सर्वत्र प्राप्त्येतन्न स्वर्गादेः। अपि तु तस्य साधनत्वमेव योग्यत्वात्· पश्वादेरिव स्वर्गशब्दस्यापि चंदनं स्वर्गः इत्यादिप्रयोगाद्द्रव्यवाचित्वमेव· सुखविशेषं देशविशेषं वा वदितव्याहकस्यान्यपरा

एम·
१

इडान्तमारभ्य कर्मापवर्गान्तं सर्वे मंत्रा उत्तरेण स्वरेण प्रयोक्तव्याः। अत उपांशुप्रयोगः। अतेरित्यस्य दर्शपूर्णमासयोः प्रवृत्तिः स्वरांतरविधानात्॥ ॥संतन्वांत्विजमनुब्रूहीत्याह यजमानः। यजमानोऽनेन मंत्रेण होतारं संबोधयेत्सतन्वान्त्विजसादिना॥ अनूक्तमेवास्य सामिधेन्यस्तस्मात्ताब्रूयात् सन्तन्वांत्विजमनुब्रूहीति श्रुतत्वात्। अयं च होतुः संबोधनार्थः अतश्च प्रोषिते न वक्तव्यः। तत्रस्थेनेह संबोधनासंबोधनासंभवात्। होतुस्तु संबोधनमध्वर्युणा कर्तव्यं विशेषकर्तुरसंभवे समाख्याप्राप्तस्यातिक्रमे कारणाभावादिति। तदुक्तं गुणेषु प्रतिनिधिः परार्थत्वादिति। अनेकयजमानेष्वेक एव होतारं संबोधयति। कृतत्वात् ता सन्तन्वांत्विजो नावनुब्रूहि। संतन्वांत्विजो नोनुब्रूहीत्यूहश्च भवति॥ ॥ अंगुष्ठाभ्यां चावबाधते पाद्याभ्यां वेदमहममुमवबाध इति द्वेष्यं। चकाराद्यजमान एवेदमहमिति मंत्रेण हस्तांगुष्ठाद्देषाद्वैरिणामवबाधते। आक्रामति। अंगुष्ठाभ्यां भूमिमाक्रामति। द्वेष्यं मनसा स्मृत्वा इदमहमिति मंत्रेण हस्तांगुष्ठाभ्यां भूमेरपीडयतीत्यर्थः। द्वेष्यस्य सन्निधावभावात्। पाद्याभ्यां वा। पद्योर्मध्यैपाद्यो। ताभ्यां पाद्याभ्यामंगुष्ठाभ्यामिति विशेषश्रवणात्। अवबाधनं च प्रबोधाजा इत्यामवबाधेतेदमहममुमवबाध इति श्रुतेः। यद्यप्यस्यां श्रुतावंगुष्ठाभ्यामित्यविशेषश्रवणं। तथापि कारणवानां पाद्याभ्यामिति विशेषश्रवणात्सामान्यस्य विशेषपरतायाः न्याय्यत्वाच्च न विकल्पः। तस्मात्पाद्याभ्यामे

२ वांशुभ्यां भूमिराक्रमणीया । अत्राभुमित्यस्य स्थाने द्वेष्यस्य नाम प्रयोज्यं । तच्च क्रत्वर्थं । न पुरुषार्थो । अभावे द्विषं
तमिति भ्रातृव्यमिति वेति पदांतरप्रयोगविधानात् । यदि द्वेष्यस्य नामोच्चारणं पुरुषार्थं तदा द्वेष्याभावे द्विषं
तमिति भ्रातृव्यमिति चेति पदांतरप्रयोगविधिं दाहृष्यदोच्चारणं न विदधीत । विहितं च । अतो नेदं पुरुषार्थमि
ति । अतस्तु यजमाने प्रोषितेऽध्वर्युणात्रैव कर्तव्यं । अंगानां प्रधानदेशकालकर्तृताया उचितत्वात् । क्रत्वर्थत्वा
देव वानेकेष्वेक एव करोति तु होपि न भवंति पुरुषार्थत्वाभावादेव ॥ ॥ अभावे द्विषंतं भ्रातृव्यमिति वा । द्वेष्यस्याभावे इदम
हं द्विषंतमवबाधे इति अथवा इदमहं भ्रातृव्यमवबाध इति प्रयोगं कुर्वीत । शाखांतराद्विकल्पः । यावत्सामिधेनि
वेदेदमहं तावतिथेन वज्रेणेति । इदमहममुमवबाध इति पूर्वोक्तेऽवबाधनमंत्रे अयमधिको विशेषः । इदमहमि
त्यस्यानंतरं यावतीयो यावत्संख्याः सामिधेन्योस्मिन् कर्मणीति यावत्सामिधेनी । प्रकृतं कर्म यावत्सामिधेनी
वेद । यावत्संख्यसामिधेनीकं जानीयात् । तावतिथेन वज्रेण द्विषंतमवबाध इत्येवंविधमंत्रप्रयोगेणावबा
धेत । तावतां पूरणास्तावतिथः । तेन तावतिथेन । अयं भावः । यत्र पंचदश सामिधेनीकं कर्म । तत्रेदमहं पंचद
शेन वज्रेणेति ब्रूयात् । यत्र सप्तदश सामिधेनीकं तत्रेदमहं सप्तदशेनेति । ननु प्रकृतौ पंचदशैव सामिधेन्यस्ताहि राम॰
पंचदशेन वज्रेणेत्येव कुतो नोक्तं किं लक्षणावाक्येन । सत्यं । पक्षांतरसद्भावज्ञापनार्थं । अस्ति हि पक्षांतरमेकविं॰श २

ति॰ सामिधेनीरपि दर्शपूर्णमासयोरनुब्रूयादित्याहुरिति । ततश्च तदा एकविं॰शेन वज्रेणेति सिद्ध्यर्थं लक्षणावाक्य
मित्यदोषः । इदमहमित्यस्य पुनरुपादानं तावतिथेनेत्यस्यावसरविधानार्थं । तावथेनेति पूरणप्रत्ययांतनिर्देशात्पं
चदशेन सप्तदशेनैकविंशेन वा एकविंशतितमेनेत्येवं पूरणप्रत्ययांतस्य संख्याशब्दस्य प्रयोगः । सिध्यतीति तच्च
पित्र्यायां सामिधेनीस्त्रिस्त्रेस्तीयः संप्रसारणं चेति त्रिशब्दस्य तीयप्रत्ययांतस्य प्रयोग इदमहं तृतीयेन वज्रेणेति
। उपसत्सु च नवसु सामिधेनीष्विदमहं नवमेनेति विप्रयोगः ॥ नांतादसंख्यादेर्मडिति स्मरणात् । इष्टकापशौ चेत
षां चतुर्विंशतिः । सामिधेन्य इत्यस्मिन् पक्षे इदमहं चतुर्विंशेन वज्रेण चतुर्विंशतितमेन वेति यथेष्टं प्रयोगः । प्राजाप
त्यपशुपक्षे तत्रैकविं॰शतिः सामिधेन्य इति श्रुतत्वात् इदमहमेकविं॰शेन एकविंशतितमेन वेति । विंशत्यादि
भ्यस्तमडन्यतरस्यामिति स्मरणात् ॥ ॥ प्रतिप्रणवमाधानं ॥ ॥ सामिधेन्यनुवचनं कुर्वन् होता पंचदशानामपि सा
मिधेनीनां मंत्रेषु अस्य वं प्रणवं पठति तत्राध्वर्युः प्रतिप्रणवं प्रणावरेकैकस्येध्मस्याहवनीये प्रक्षेप आधानं प्रक्षेपं करो
ति । स चायं कालार्थः संयोगो नांगांगिभावः । उभयोरप्यन्यार्थत्वात् । इध्मास्त्वग्नीधनार्थः । सामिधेन्योपीध्यमानाय प्र
नुवाहिन्यः । प्रयोजनं सामिधेन्यामनूक्तायामिध्मकाष्ठे प्रक्षिप्ते सामिधेनी अनूक्तैव । सामिधेन्यभावेपि पयस्यायां
इध्मकाष्ठानीप्रक्षेपो भवति अग्नीधनार्थत्वात् । उपवाजनसमार्गादिवदग्निसंस्कारकत्वात् । सौत्रामण्यां च प्रतिप्रस्थातु

रपि दक्षिणाग्नौ॥ ॥समिद्ध इति प्रागतः सर्वमिध्ममेकवर्जमनुयाजाश्चेत॥ ॥समिद्धो अग्न आहुत समिद्धो अग्न आहुतेत्यतः प्रतीकात्प्राग्यः प्रस्तावस्तस्मिन्प्रस्तावे एकवर्जं एकां सामिधेनीं वर्जयित्वा अवशिष्टं सर्वमिध्मं प्रक्षिपेत्। अनुयाजाश्चेदित्ययमनुयाजाभावेति तदेकवर्जं एकां वर्जयित्वा। इहानुयाजानामवश्यंभावादेतद्विकृतिविषयं। आतिथ्यादावनुयाजाभावे समित्परिशेषणं न भवति। समिद्धो अग्न आहुतेत्यतः प्राचीनं सर्वमिध्ममभ्यादध्याद्यदन्यसमिध इति। समिद्ध इति प्रागत इत्यतः शब्दोपादानात् सामिधेनीविवृद्धावागनुमानं स्यात्। प्रस्तावे सर्वेध्मस्य प्रक्षेपः। ऋग्वृद्धौ हि काष्ठवृद्धिर्भवति। तथा चाहापस्तम्बः॥ ॥प्रस्तावे प्रस्तावे समिधमादध्यादिति सामिधेनीविवृद्धौ काष्ठानि विवर्द्धन्ते प्रतिस्त्वसमानानामुपस्कृतिवत् समिद्धो अग्न आहुते समित्तापेकामनूयाजसामिधमवशिष्य सर्वमिध्मशेषमभ्यादध्यात् परिधानीयायां वेति। ॥अनुवचनान्ते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेणापूर्वमाघार्याहाग्निमग्नीत्संमृड्ढीति॥ त्रिरिव प्रथमां त्रिरुत्तमां मन्वानमन्वनुब्रूयादिति प्रकृत्यैतदनुवचनमिति श्रुतं। अतोऽनुवचनान्तः सामिधेन्यन्तः। तस्मिन्ननुवचनान्ते सामिधेनीनामन्ते धृतेन वेदेन कुशभूतेनाहवनीयमग्निं त्रिरुपवाजयित्वा आज्यस्थाल्याः सकाशादाज्यं गृहीत्वा स्रुवेणाहवनीये उत्तरे भागे ऋजुं दीर्घं संततं प्राञ्चं दक्षिणमेव पूर्वमाघारमाघार्य ततोऽग्नीध्रं प्रति अग्निमग्नीत्संमृड्ढीति। न प्रैषमाह। स्रुवेणापूर्वमाघारमाघा

र्याहाग्निमग्नीत्संमृड्ढीति श्रुतत्वात् तथा स्रुवेणैतमाघारयतीति तूष्णीमेतमाघारयति। न स्वाहेति वचनेति श्रुतत्वाच्च। अत्र प्रजापतिर्देवता। अनिरुक्तत्वात्। पूर्वो देवतासामान्यादिति सूत्राच्च। तथा चाहापस्तम्बः। प्रजापतिं मनसा ध्यायन्निति। अत्र स्वाहाकारोऽपि न भवति न स्वाहेति वचनेति प्रतिषेधात्। पूर्वेऽपि न च शब्दोऽप्यर्थे। स्वाहाकारोऽपि न भवतीत्यर्थः। उपवाजनं तु दृष्टार्थं। नहि वेदेन त्रिरवविशिष्टोपवाजनेनाग्नेर्दीपनं दृष्टोऽर्थः संभवति। तस्माद्दृष्टार्थमेव। प्रयोजनं परिशिष्टरूपि भवति स्रुवेणेति जुह्वा निवृत्त्यर्थं। यतो जुह्वाऽवचन इति होमे जुहूः प्राप्नोति। आघारमिति संज्ञा व्यवहारार्था। आघारयेदित्येतद्दक्षिणमप्राप्त्यर्थं। ऋजुमाघारयेदिति। यः पूर्वमाघारयति संततमाघारयति प्राञ्चमाघारयतीति॥ वरुणप्रघासेषु सौत्रामण्यां चाग्नीदग्नीन्संमृड्ढीत्यूहः। कर्मणोऽभयोः संमार्गः। दशाहुतिपक्षे वमध्यमयोरग्नीत्संमृड्ढीत्यूहः। कर्मणोऽभयोः संमार्गः। दशाहुतिपक्षे वमध्यमयोरग्नीत्संमृड्ढीत्यूहः। षडाहुतिपक्षे तु संमार्गो न भवति। पूर्वाघारस्त्वदृष्टार्थ आरादुपकारकः। अत एव प्राकृतके गृहमेधीयपयस्यायां न भवति। उपवाजनं तु प्रवर्त्तत एवाग्नेर्दृष्टसंस्कारत्वात्। मानवे वा नु वा हुतदेवतास्वप्युपस्पृश्य वेदेनाग्निं त्रिरुपवाजयत्ययं विधाः संमृज्य पूर्वं स्रुवं स्रुवायामवनीय तस्यापरस्य वेदेरुपयामगृत्तरे परिधिसंधिसंश्रोपित्वोत्तरार्द्धेन्याहितस्य प्राचीनं मनसा प्रजापतये स्वाहेति ज्वालितं जुहोतीति संपाद्येन ध्रुवमथाप्यपयथाह्वानं स्रुवं वेदं च निदध्याति। काठके च।

५ ।इध्मो ऽभिधीयते ऽत्राप्रसिद्धेश्वप्राक्चेदसमिधमाह ध्मनस्य न क्रामुत्क वेणाघारं मनसा प्रजापतये स्वाहेत्युत्तरस्रुचे ऽग्नेः संततं
दीर्घमा चं ज्योतिष्मत्याघारमाघार्यहाग्नीत्सम्मृढीत्यादि। ।।इध्मसंनहनैरनुपरिधि संमार्ष्ट्यग्ने वाजजिदिति
त्रिस्त्रिः प्रक्रामं। इध्मस्य संनहनानीध्मसंनहनानि तैरिध्मसंनहनैरिध्मबन्धनार्थैस्त्रिगुणैरनुपरिधि परिधि
षु निकृष्टेषु त्रिषु अग्निप्रदेशेषु प्रदक्षिणं क्रमेणैकैकस्मिन्प्रदेशे आहवनीयमग्निं त्रिस्त्रिः संमार्ष्टि संमार्जनेनाग्नि
विज्ञस्कं उज्ज्वलं करोतीत्यर्थः।। अग्ने वाजजिदिति मंत्रेणाग्निं कृत्वा परिक्रामं परिक्रम्य परिक्रम्य नं तत्परिधिदे
शं गत्वा तत्साम्नानुसारेण पार्श्वे ते ग्निं संमार्ष्टीत्यर्थः। अथ संमार्ष्टीति प्रयक्क परिक्रामं संमार्ष्टि परिक्रामः
त्रिपोगपं युंजंति त्रिस्त्रिः संमार्ष्टीत्यत्र वृद्धिपक्षः ह संमार्ष्ट्यग्ने वाजजिदिति श्रुतेः। अन्ये तु परिक्रामिनः
परिक्रामं परिक्रम्य परिक्रम्य प्रक्क तत्वा ज्ञमेवाहवनीयं प्रदक्षिणा परिक्रम्य पश्चिमह्रादिष्ठितो दक्षिणपार्श्वे संमा
र्ष्टि तत्रैव स्थितः पश्चिमपरिधि उदग्रं संमार्ष्टि तमतः पूर्वेणापरीत्य तु उत्तरतः संमार्ष्टि उपरि च एवं परिक्रामं
अन्ये त्वाहुः अग्निसंस्कारापपश्चिमापार्श्वे प्रथमं परिधिः परिहितस्ततो दक्षिणास्ततश्चोत्तरश्च अग्निप्रकरणो
प्यक्रमेव योगादृष्टो न चेह कश्चित्प्रयक्रमस्य विरोधस्तथापि त्युरक्षो स्थित्व भवतीति पश्चिमपार्श्वे एव प्रथमं सं
मार्जनीयस्ततो दक्षिणातस्ततउत्तरत श्वेति त्रिस्त्रिरिति द्विःशिरिति शित्रिस्त्रिरिति तिर्यमा तत्र च प्रतिदिशं सकृन्मकृन्नं

एमा०
५

त्रेणाग्निं संमार्ष्टि ततो प्रदक्षिणं परिक्रम्योत्तरतः स्थितः पश्चात्पार्श्वे ऽग्निं संमार्ष्टि पुनः प्रदक्षिणं परीत्य प्रजातिस्था
नस्थ न २८ पुत्तरपार्श्वे दक्षिणे हस्तदण्डो अपरेऽनुपरिक्रम्योत्तरतः स्थितः पश्चात्पार्श्वे ऽग्निं संमार्ष्टि पुनः प्रदक्षि
णपरीत्य प्रजातिस्थानस्थ न २९ क्रामं संमार्ष्टीति वचनात्प्रतिदिशं संमार्जनार्थं परिक्रमणं कुर्वन्ति तद्यथा पूर्वेण
परिक्रम्य प्रजामिति स्थानस्थो दक्षिणपार्श्वे ऽग्निं संमार्ष्टि पुनः प्रदक्षिणं परीत्योत्तरस्थो मध्ये तु पर्यग्निं तस्थौ संमा
र्ष्टि केचित्त्रेति संमार्गं प्रदक्षिणमेव परिक्रम्यापविश्य संमार्गं कुर्वन्ति अत्रेतेच पक्षा दिनरथाहुस्ति तन्नेमुत्पारि परिक्रा
मपिपत्रायनुवर्त्तते परिक्रम्याहवनीयस्य परिमध्यप्रदेशेत् स्थीत्रिः संमार्ष्टि त्रिस्त्रिरिति वीप्सया त्रापित्रित्वप्राप्तेः
अथो परिष्टात् स्थौत्रिरिरिति श्रुतेः अत्र स्तेत्स्थीमिति पत्नोः स्याप्तिसूतु दिक्षु प्रतिदिशं संमंत्रावृत्तिर्भवतीति न्याय
ते उपरिष्टात्तु स्थीमितिक्रव स्पार्श्वेषु सकृत्सकृद्धवत्तेते संमार्गमंत्र इति दर्शयति इतरथा सकृदेक मेक मंत्रो सकृन्मंत्रव
चनमिति सर्वोदो सकृदेव संमंत्रः स्यात् कर्कोचार्यास्त्वेवमाहुः तपरिधिषु पध्मानक्रमेणा संमार्गः न त्वयं परिधिसंस्कारोपे
ना भिघट्टत्वात् क्रमस्याश्रीयते अग्निसंस्कारस्त्वयं तेन प्रदक्षिणोपचाराद्दक्षिणा तावत्संपादनाय प्रथमं दक्षिणतः
संमार्गः एवायं संमार्गोपि पावदुक्तो पि भवति कुतः होमसाधनभूताहवनीयसंस्कारत्वात् अदृष्टार्थे स्वार्यं तेनाहवनी
यस्थानापन्नास्तु परिधिष्वपि भवतिरशाहुतिपक्षे चावभृथेष्ठामयप्यपि भवति तत्रायो वाजजितो वाजं त्वा सरिष्यतो

५

वीतजितःसंमाज्मीत्सहः अपरमाहवनीयाद्दंतलिंकरोति नमोदेवेभ्यःस्वधापितृभ्यइतिदक्षिणतस्तानं आहवनी
यात्परं आहवनीयस्यपश्चाज्जुपभृतोः पुरस्तात्नमोदेवेभ्यइतिमंत्रेणाध्वर्युरंजलिंकरोति नमस्कारार्थत्वाच्चपु
टांजलिः ततः स्वधापितृभ्यइत्यनेनमंत्रेणतस्मादंजलेर्दक्षिणतोद्वितीयमंजलिमुत्तानंकरोतिपूर्वाभिमुखयज्ञोप
वीतीसेवामनुः उत्तानौपाणीकृत्वाजुहूपभृतोरंतरइति तेरेतदंजलिमुत्तानंकरोतिपूर्वाभिमुखयज्ञोपवीतीसेवामनुः
उत्तानौपाणीकृत्वाजुहूपभृतोरंतरइति तदेतदंजलिकरणमुत्तराघारार्थं कुतः श्रुतेः सस्रुचोत्तरमाघारमाघारयिष्य
न्पूर्वेणाकृत्वांजलिंनिदधातिनमोदेवेभ्यः स्वधापितृभ्यइति अतश्चोत्तराघाराभावेंजलिकरणाभावः अपउपस्पृ
श्यमुपभृमइतिजुहूपभृतोरंतरांजुहूंकृत्वादक्षिणामिक्रामत्संप्रक्षिणाविद्धाविति अंजलिकरणानंतरमप
स्पृश्यदक्षंस्पृष्ट्वाप्रथमंपाणिभ्यांजुहूमादायोत्तरांकृत्वानुपभृतउपरिनिधायततः सुपमेमइतिमंत्रेणतेद्वेअपि
स्रुचौसहैवादायाग्निंणाविद्धाविति मंत्रेणाग्निंदक्षिणातिक्रामतिदक्षिणस्यादिशिगच्छतीत्यर्थः सुपमेमभृपात्रमिति
स्मृत्वावांस्तइतिश्रुतेः आपस्तंबः उपभृतिजुहूमत्यादधातिमुखेनाभित्सुमुखतउयावहरति सर्वत्रेवमत्याधा
नोपावहरणेनभवतीनचशिजपतिनाभिदेशस्रुचौराधारमध्ययाविदवुमावामवक्रमिषमित्येतेनस्रुचौरपरेणाम
ध्यमपरिधिंमनवक्रामन्नास्तरमितिमहापितृयज्ञेचस्रुचोरादानमंत्रेअस्मन्नमधामंप्रदेवपितृभ्यआज्यं संस्रियास

राम०
५

मिसृद्धः कार्यः नत्वत्रउपस्पृश्येतिनवक्तव्यं पित्र्यंमंत्रमुक्त्वापउपस्पृशेदितिपरिभाषायामुक्तत्वात् इतिचेत्र नप्राचीनावीती
त्वदक्षिणामुखत्वयोरुदाहरणार्थंपुनरुक्तमित्यदोषः ननूत्तरांजुहूंकृत्वेत्यत्रार्थमुक्तं पाणिभ्यांजुहूंपरिगृह्योपभृता
धानामादावकालइतिपरिभाषायामुक्तत्वात् एतस्यार्थे अर्थेसूत्रेतस्यार्थस्यज्ञापकंभवतिमंत्रवज्जुहूपभृतोरादानमु
त्तराघारार्थमेवादानंभवति नप्रयाजाघारार्थमादानमिति यतः पुनः सूत्रकरणेनैवज्ञापते। स्वस्मात्स्रुग्ग्रहणादानादिदं
स्रुगादानमन्यततोविशिष्टमिति अंतरिक्षणाविसयंजतिस्थानंप्रतिगमनेमंत्रः सोप्युत्तराघारार्थमेवेतिगम्यतेनेवाऽवांत
रप्रकरणात् परिधीनपरेणसंस्रवहोमांतः अपरेणेत्यनपसृत्यपार्श्वतःस्रुग्भागाएनयाद्वितीयेति परिधीनितिद्विती
या परिधीनपरेणपरिधीनांपश्चात्स्रुवांपूर्वेणाहोष्यतोहोमंवक्ष्यतिशिष्यतोध्रुवीयोगमनागमनायापूर्वसंस्रवोभागइत्यर्थः
संस्रवत्यनेनेत्यस्मिन्निति संस्रवः गोचरसंचरेयः सवेतिथियिंसंचरेणभागंइत्यर्थः नोत्तराघारमात्रेहोष्यतः संचरइत्यु
क्तत्वात् अन्यथापरिधीनपरेणदक्षिणातिक्रामतीत्येतावदेववक्ष्यात् सव्येनेतोदक्षिणेनामुतः गच्छतीतिस्रुप्रापः
इतोऽस्मात्उच्छ्रायनाद्यजतिदेशंगच्छसव्येनपादेनगच्छति अमुंवापरातिदेशात्मगमागच्छन्दक्षिणेनपादेनप्रत्यागच्छ
ति एकैकेनपादेनगंतुमशक्यत्वात्तस्यप्रथममप्रवृत्ति विवक्षितानेनेतोगच्छतासव्यपादः प्रतिक्रमणांप्रथमंप्रथम
मग्रतः प्रणेतीयः आगच्छताचदक्षिणइति अथानोतिक्रमणात्यतिभक्तस्यपश्चाद्भावप्रथंसव्येनातिनाक्रामतिदक्षि

६ एनाघ्राप्येतिश्रुतेः एतदपि सर्वार्थमेव अथातो तिक्रमणाप्येत्यतिक्रमणमात्रं ग्रहस्य अवरणात् न चाघ्राणपेक्षं स्थिति
अवणाद्वाघ्रावणाद्विशिष्टस्य वातिक्रमणोऽपि नियमः निवाच्यं तथा सति विशिष्टानुवादलक्षणवाक्यभेदापत्ते
र्तं तस्मात्सर्वार्थमेव अतएव॥ ॥स्वमतं कारेणोत्तराघारे स्रुवित्रितं। उक्तं च। आघ्राघ्रावणादिविशिष्टानुनियमोपष्टयं भवेत
।विशिष्टस्यानुवादत्वाद्वाक्यभेदः प्रसज्यत इति॥ ॥वसुमन्तीमित्यस्याय १ इदं इंद्र इति जुहोत्युत्तराघारं। वसुमन्तीम
ग्नइति मंत्रेण यजमानिर्दिशेत् उद२२. प्राङ् वसव्याय ईशानाभिमुखः स्थित्वा जुहुयात् मन्तार्थेन इदं इंद्र इति मंत्रेणाहवनीयस्य दक्षि
णाभागे जुहीर्घं संततं प्रांच जोहवेनात्स्पेनोत्तराघारं जुहोति। तस्माद्दक्षिणात्तिष्ठन्नाघार इति सम्यदुभयत्र
आघारयतीति च श्रवणात्। उभयत्र इतिष्टवीयात उत्तरतः। उत्तराघारश्च दक्षिणात इति। उत्तराघारद्रव्यस्य संस्रा
व्यवहार्यं॥ जुहोतित्वादुपवेशनं प्राप्तं अवस्था यत्यनेन तद्वार्यते। कुतः तिष्ठं तं यं वा चेत् तस्माद्दक्षिणात्तिष्ठन्ना
घारयतीति वचनात्। अतउत्तराघारे तिष्ठति क्रियावाचनिकी। तेन शास्त्रदृष्ट्यादि जुहोति इष्टापि सहजुहीतेना
प्यनतिष्ठते वेंद्रा यथाहेत्युत्तराघारो होतव्यः। मंत्रवर्णाच्चात्रैंद्रो देवता। कुर्यं च्छंदः। इदं इंद्र इति जुहोतीति होमो विहि
तः। होमश्च देवतोद्देशेन यस्मिन्कस्यचिद्द्रव्यस्य प्रक्षेपः। तत्रोभयमपि भाविन्मांदेवतायां तद्द्रव्यचतुष्टयोरश्रवणान्म एम०
त्रस्य च क्रियासाधनाभिधायित्वसामर्थ्यात्ततो मंत्रवर्णात् देवता परिकल्प्यते। अतश्चात्रैंद्रो देवता। ततश्चैंद्रमिंद्रायेति हो ६

मास्तु इंद्रस्य त्यागः कर्त्तव्यः। यागे होमे च प्रक्षेपात्सर्वे अवरुद्धं पसर्वेत्र त्यागः कर्त्तव्यः। तथा च कारिकापा। आदौ द्रव्यपरि
त्यागः पश्चाद्धोमो विधीयते। प्रयोगरत्ने मिंद्रायनममेति यथार्थतः। अवक्तं नुतपजेदन्ने मनसा वा वयापि च। ततश्च प्रक्षि
पेद्दग्नावितिधर्मः सनातनः। अत्यक्तं जुहुयाद्यस्तु मोहेनान्वितमानसः। देवा हव्यं न गृह्णंति कव्यं च पितरस्तथा
। यत्किंचिज्जुहुयादग्नौ तत्सर्वं त्यागपूर्वकं। अन्यथा जुहुयाद्यस्तु नरकं स तु गच्छति। तथा च त्रिकांडमंडनः। तुल्य एवाधि
कारस्यादंपत्योरुभयोर्मिथः। कर्तृत्वं च तयोस्तुल्यं द्रव्यत्यागे प्रवक्ष्यते। पद्धासागं पतिः कुर्यात्पत्नी तदनुमन्यते। अधि
कोऽपि विषयप्रोक्तं शास्त्रानुसारिणा। तथा संनिधौ यजमानः स्यादुद्देशत्यागकारकः। असंनिधौ तु पत्नी स्यादुद्देश
त्यागकारिका। असंनिधौ तु पत्न्याः स्यादध्वर्युः स्वदनुज्ञया। उभयोरप्यसंकेतौ ऋत्विग्भिस्तानुज्ञया विना। सर्वदा यजमा
नो वा सजेत्तद्धि श्रुतेः श्रुतिरिति। मंडनः। त्यागं तु सर्वथा कुर्यात्तत्रान्यतरस्तयोः। उभावप्यसमर्थौ चेन्नियुक्तं च
श्च न सजेदिति। त्यागवाक्यस्यादावोंकारश्च कर्त्तव्यः। यागहोमादिष्विति सर्वानुक्रमणपाकुसमर्थौ चेन्नियुक्तं च
श्च न सजेदिति। त्यागवाक्यस्यादावोंकारश्च कर्त्तव्यः। यागहोमादिष्विति सर्वानुक्रमणपाकुक्तत्वात्। सच्च यमुत्तरा
घारस्याराद्युपकारकोऽदृष्टार्थः। ततश्च गृह्यमधीयोपसत्त्वयस्यादौ याज्ञवल्क्ये निवर्तते। वचनाच्च प्रयाजार्थेन जोहवेनाक्रि
यते। स्रुचा गृहीतं चाएतस्मात्तस्याघार्यत्रिरितः तथाजानाम्यजनीति। प्रयाजार्थेनाच जौहवस्यवचनात्। सयच्छुच्याहीतं

७ वाशतदभक्तस्यजुहोंगृह्णातिप्रयाजेभ्योहितंगृह्णातीति। अतश्चदर्विहोमेषुप्रयाजाभावेनतस्येजौहवाभावेधाघारस्याव
श्यकर्त्तव्यत्वात्स्थाल्याःसुग्रहीतेनैंस्रुवस्याहुतिमंत्रेणातिष्टैतेवहोमन्यः। मानवे। दक्षिणार्द्धेम्याहितस्याहुत्त्रिधारइतिमंत
त्रेणांचंदीर्घमनुपूर्वमविच्छिन्नमाघारमाघारयतीति। लौगाक्षिरपि। विष्णोःस्थानमसीत्यवस्थायोर्द्धोऽघारइतिदक्षि
णार्द्धेग्नेःसंततंदीर्घमाघारमिति। महापित्र्यज्ञेचास्विष्टकृद्देवपितृभ्यइंद्रआज्येनेत्सहः। कार्यः॥ आघार्यास८ एव
र्थयंस्रुक्चावेत्यजुहाध्रुवां८ समनक्तिसंज्योतिषेति। आघार्येतिचत्तहृद्यादिगुणप्राप्त्यर्थो होमद्रव्येस्रुवेणवजुहोति
शब्देनमविहितत्वात्। श्रूयतेचाघारोमध्ये सततजुमाघारयतिसंततंदीर्घंचमिति। आघारानंतरंस्रुचौपरस्परमस्य
शयेन्नेत्ययजतिस्थानादूर्ध्वः पश्चादागासोपविश्यजुहौजौहवेनाज्येनध्रुवांध्रौवमाज्यंसमनक्तिजौहवंध्रौवमध्य
जुहेवद्यारयतीत्यर्थः संज्योतिषासनेनमंत्रेण। अत्रगाह्यतामिपध्याहारः। ननुजुहाध्रुवामितिह्युक्ते। कस्मिन्
तांस्मिन्निमितिजौहवेनध्रौवमितिव्याख्यायते। अंजननक्रियापरस्परसामर्थ्यात्। ज्योतिर्वाइतरस्यामाज्यंभवतिज्योति
रितरस्यांतेहोतेनजभज्योतिषांसंगच्छेतइतिश्रुतेः। ननुतर्हिजौहवेनैवपरकिमितिनोक्तं। कथंजुहूरिति स्रुवस्यकरणता
वारणार्थंजुहूक्तमितिनदोषः। स्रुचापध्रुवासंस्कारोप्यन्तराघारस्यैवप्रवर्त्तते। पतएवंश्रूयते। अथाम८ स्पर्शय
न्स्रुचौपर्यस्यध्रुवयासमनक्तिशिरोवैयज्ञस्योत्तरआघारआत्मावैध्रुवातदात्मन्येवैतच्छिरःप्रतिदधातीति॥ निधायेध्म

एम०
७

संनहनान्यादायोत्तरआघारआत्मावैध्रुवातदात्मन्येवैतच्छिरःप्रतिदधातीति॥ ॥आवपेत्साह॥ ॥ध्रुवायामंत्र
णानंतरंस्रुचौनिधायपश्चात्स्थानेपापिनाहोतारमुत्तरेणागतोस्रुक्स्यपश्चात्प्राङ्मुखोपविष्टापद्ध्मसंनहनान्यादायहस्ते
गृहीत्वोआस्येत्वाह। एवैवमवत्स्यांआवयतिमदृध्मसंनहनान्येवाभिपद्याआवयतीतिश्रुतेः॥ ॥अस्तश्रौषडि
त्यनीत्। अध्वर्योर्ह्नरतोदक्षिणामुखोवाक्षिणाश्रौषडिमिवंअग्नीत्प्रत्याश्रावयति॥ ॥वेदिंबर्हिरिध्मशकल
मपाछिधेचा॥ ॥एकशाखिनोवेदिंबर्हिर्वैदीघ्नंबर्हिरादायेध्मशकलंवाऽपाछिंधादायाश्रावयंति। तद्वैकेवेदसी
मायेवाबर्हिरभिपद्याश्रावयंतीध्मसवाशकलमछिद्याश्रावयंतीतिश्रुतेः। अभिपद्येत्यस्यादायगृहीत्वेत्यर्थः॥ स
वेत्राकुतः सन्नकृतामदृध्मसंनहनान्येवाभिपद्येतिश्रुतेआरायेतिसूचितत्वात्। अथ्यापरिधीनभिपद्याश्रा
वयतीतिश्रुतेस्पर्थमपरिधिग्रहीतोतिसूत्रितत्वाच्च॥ ॥एव८ सर्वत्राश्रुतमतस्याकृतेषु। सर्वेश्रुतमप्रत्याश्रुतेषेवं
भवति। एवमिम्याआवणोधूपुः प्रत्याश्रावणोग्नीदिति। तथंचश्रूयतेआश्रावयत्यध्वर्युस्तदग्नीधंप्रत्याश्रावयतीतिसा
ग्नीत्रापमाहरेदास्यप्रत्याश्रावणात्प्रत्याश्रावयत्यग्नीदिति। अत्रचाध्वर्योग्नीध्रवाश्रुतमप्रत्याश्रुतेषुसर्वत्रैव
श्रेयति। पितृभूत्याचार्येस्तुएवंव्याचकृतेसर्वत्राश्रुतप्रत्याश्रुतेतिध्मसंनहनान्यादायाध्वर्युराश्रावयेदग्नीधःप्रत्याश्र
वाश्रावयेदिति नदयुक्तमितिकर्काचार्यः नह्याश्रावणमात्रेविधानमेषामिति तस्मादस्मदुक्तएवार्थः अत्राहापस्तंबः

इध्मसंनहनानिस्फ्याश्चयसंगृह्यवेद्याम्बन्धपामअंतमाघायोत्तरतः प्रक्षापावतिष्ठेतध्रुवौध्वर्युपुरस्तादाग्नीध्रइध्मसंनहना
न्याग्नीध्रोन्वारभ्योश्रावयेत्याश्रावयति अस्तुश्रौषडित्याग्नीध्रोपरेणाकंस्यक्षिप्त्वामुवतिष्ठस्फ्यसंमार्गाध्वर्युरपन्नेत्या
श्रावयत्याग्नीध्रोसौमेसर्वत्रैवमाश्रावयत्याश्रुतेभचतः सामाभनवेव स्फ्यसंमार्गीपाणिराग्नीध्रः यथ्वाडत्कारस्योर्द्धस्ति
घन्नस्फ्यश्रौषडितिप्रत्याश्रावयतीति कात्यद्नेस्फ्यसंमार्गमन्वारभ्योहेति अथवेशांवआग्नीध्रस्योत्तरतउपचारःस्फ्य
संमार्गपाणास्तिष्ठतोदक्षिणामुखस्यपथास्वरमस्फ्यश्रौषड्डितिप्रत्याश्रावणमिति अथप्रवृणीतेग्निर्देवोदैव्योहो
त्महृवामक्षद्वृह्माग्विकिलान्मनुवद्भरतवदमुवदमुवदितियजमानार्षेयाण्याहपरस्तादर्वाक्त्रीणि क्रमस्यपाद्य
देवश्रामत्मादयशह्गपगहृह्व्यस्योत्तरत्रानुकर्षणार्थः अथगृह्णीतेनैवेध्मसंनहपरस्तादर्वाक्त्रीणीति क्रमस्य
पाद्यदेवश्रामत्मादयपशु नादिनाहोतारंप्रवृणीते अग्निर्देवोदैव्यइत्यादिनामंत्रेणाथवाश्रुतप्रत्याश्रुतप्रत्याश्र
तयोः प्रवरणार्थत्वात्पनाथाद्यशब्दः सर्वप्रवरण्याश्रावयतीतिश्रुतेः समुवदमुवदिसत्रसर्वेनामस्थाने यजमा
नस्यसंबंधीनिहृदेजस्मृतानिपात्तत पितृस्थानीपादवोपितातत्पुत्रस्तौत्रपाणित्रीणपार्षेयाणिस्फ्यपस्यानि
वृणीते हृत्वाक्रमेणावर्तयतिवद्नतुवाचस्तुचेतित्रीणितिकुतस्त्रीवृणीतइतिभारद्वाजात्परात यरस्तादर्वाक्पंचाणि
तइतिप्रकृतेपरंहिपितैवाग्रेयपुत्रायपौत्रस्तिश्रुतेश्च यजमानजयहृणांक्रान्तिमार्षेयवृत्तमार्थे अथार्षेयंप्रवृणीते।

एम
८

इतियजमानस्यप्रक्षापिसूज्यदेवेजोमंत्रकृतस्यायमामार्षेयंप्रवृणीतइतिहरिस्वामिनस्यावंतोवामंत्रकृतः अथवा
यजमानस्यार्षेयसंबंधिनोमहर्षीणांमध्येयावंतस्तऋषयोमंत्रकृतोमंत्राणांद्रष्टारोभवेयुस्तावतोवृणीते नत्रीणपवेतिनि
यमः तेचप्रवराध्यायेगोत्रविशेषणएवैषांकथिताःसंति केषांचिदेकः केषांचिद्द्वौ केषांचित्त्रयः केषांविमंचचेति तेनय
ज्ञोत्रस्यपावतस्तत्रउक्तास्तस्यतागंतोवरीतव्याइत्सर्थः तथाचाहापस्तंबः ऊर्ध्वंतुमासीनंहोतारंवृणीतेग्निर्देवोहोतादेवा
न्यक्षद्विद्वाग्निकित्वान्मनुवद्भरतवदमुवदमुवदितियथार्षेयोयजमानस्यन्मयज्ञाभिमंत्रस्ततोवृणीतेपिचैकंद्वौ
त्रीन्पंचनवतुरोवृणीतेनपंचातिवृणीतइति मानवेपि अमुवदमुवतदृष्टौमञ्जमानस्यार्षान्प्रवृणीतएकंद्वौत्रीन्पंचवाति
पुरोहितार्षेयेणावा राज्ञोयजमानस्यपुरोहितार्षेयेणवापुरोहितस्यगुरोरार्षेयाणिवावृणीते स्वकीयातिदेतिविकल्पः
क्षत्रियवैश्ययोःप्वानित्यं अभिषेकादिराहित्यस्यक्षत्रियमात्रस्यवैश्यपाश्यस्याविनित्यंपुरोहितार्षेयोच्चारणेनार्षेयंवृ
णीते राजन्यविकल्पः मनुवहितिचासर्वेषां अथवासर्वेषांब्राह्मणक्षत्रियविशांमनुवदितिएतमपदंसकृदेवार्षे
पल्लानेत्रयोरस्य अभ्यासेकारणाभावात आपस्तंबःपुरोहितस्यप्रवरेणराजावृणीतइति अपिवानार्षेयंवृणीते
मनुवदितियवद्यारिति च मनुरपि यथब्राह्मणायजेतपुरोप्रवरेणप्रवृणीयादिति ब्रह्मण्वदत्यद्ब्राह्मणात्रस्यपज्ञस्य
प्राविताराहोमानुहितस्यप्रवरेणप्रवृणीयादिति॥ ॥ब्रह्मण्वदाच्चवक्षद्ब्राह्मणात्रस्ययज्ञस्यप्रावितारासोमानुपशतिहो

र नामग्रहणं । आर्षेयोच्चारणादनंतरं ब्रह्मण्वदित्यादिकं मंत्रशेषं ब्रूयात् । तदंते सोमानुषइत्यस्मात् आसादित्यस्य पदस्य स्थाने मु
१ कशर्म्मेति होतुर्नामग्रहणं कुर्यात् । असौ मानुष इति निर्मं मानुष ँ होतारं प्रवृणीतइति श्रुतत्वात् ॥ ॥७पा८ ध्रुवा
। अथवा होतुर्नामग्रहणमपांशु कुर्यादुच्चैर्वेति विकल्पः । सीदति होता होतुरुपांशुनामग्रहणं ति मानुष इत्युच्चैरित्याप
स्तंब ॥ अग्निर्दैवइत्यादेरयमर्थः । अग्निरयं देवः न मानुषः भूतमात्रमचेतनं । देव्यो देवेऽपि पुरस्कृतः संभावितश
क्तिः । होता साधुहोता । यदुंटशो होता सदेवान्यक्षत् यजतु आ च वहतु च । तमहं होतारं वृणाइत्यर्थः । विद्वान् ऋजुनानन्य
था यत्र यष्टव्यो न हि दोषं सम्यगेवास्तक मेस्यर्थः । कथंचिकितान् । चेतनावान् । अविस्मरणशीलः साधुनाथप्रमत्तः
सन् मनुष्वत् । मनोरिव । यथा स्वायंभुवादेर्मनोर्यज्ञेऽग्निना देवा इष्टास्तथास्यापि यजमानस्य यज्ञे यजत्वित्यर्थः । भरत
वत् भरतो मानवो वर्षाधिपतिस्तस्येव । वसिष्ठादिर्यजमानस्य पूर्वजो हि भूतस्येवाब्रह्मसमर्वे पूर्वजस्यस्येव । आ च व
क्षत् । आवहतु च । वह्नि यद्यपि देवमग्निरेवात्रहता । तथापि ब्राह्मणात्र्यस्य यज्ञस्य प्रकर्षेणावितारो रक्षितारः ते
स्येन तंत्वानाः प्रत्यक्षमुपलभ्यंते । अग्निस्तु आगमात् । सोपि वसति ब्राह्मणशरीरेण देवाधिष्ठाय होत्रं करोति न दश०
तस्माद्भिन्ना । ततश्चैवं न मंतव्यं । यदि तावदग्निर्होता ततः किं मानुषेण । अथ मानुषस्ततः किमग्निनेति तयोः संहत्य १
कारितार्थ्यापनायाह ब्राह्मणा इति । संहत्यकारित्वे विशेषमाह । असौ देवस्तोपजस्तैना च मानुषो होता देवान्यक्षदा च व

जइति वक्तेतात्मग्निं यजंतमयमपि यथाशक्ति आरंभमात्ररूपेणायजत्स्वित्यर्थः । एषतावत्प्रकाशो मंत्रार्थः ॥ ॥ संम
ष्टाउपविशत ॥ ॥ वरणानंतरं तो होताउच्छ्रापाध्वर्युमग्नीध्रंचांतयोः संमृशति । नोच्चाध्वर्युग्नीध्रौ होत्रासंमृष्टौ संतौ
उपविशतः । अथाध्वर्युवाग्नीध्रं वसंमृशतीति होतृकर्तृकं संमर्शनं कृतं ॥ ॥ अग्निर्होतेति स्रुगादापनं प्रयाजे
षु संनिधेः । अग्निर्होतेति सेतत्स्रुगादापनं प्रयाजेषु भवति । स्रुचावध्वर्युणादाप्यते नेनपठितेनेति स्रुगादाप
नं । प्रयाजेष्वेव कुतः । संनिधेः । प्रयाजसंनिधौ स्रुगादापनस्य पाठात् । अतश्च पशावेकादशप्रयाजो रूपे पुनरुच्चार
णं । अन्वर्थसंज्ञाविज्ञानाच्च देवत्रमाप्नोतीति तेन प्रयाजेष्विति नियम्यते । समाख्यातः संनिधेर्बलवत्त्वादिति ॥ ॥ घृ
तवतीमित्युक्ते स्रुचावादायातिक्रम्याश्राव्य समिधोयजेति । होत्राघृतवतीमित्यस्मिन्पदेउक्तेध्वर्युः स्रुचावनु
रूपमतावादायातिक्रम्य वेदेरुपरस्माद्देशात्परिधीनपरेणासव्येन पादेन यजतिदेशं गत्वा आश्राव्य समिधोयजे
त्याह । प्राक्समेवातिक्रमणमनुवाक्यापरिसंख्यानार्थमुच्यते । नकुतः । अथ परपुरोनुवाक्याकाः प्रयाजाभवं
तीति श्रुतेः । घृतवतीमध्वर्यो स्रुचमास्यस्वेति तदध्वर्युप्रैषो । नीतिश्रुतत्वाद्घृतवतीमित्युक्त इति सूत्रितं । आ
पक्षंवः घृतवतीशब्दे जुहूपभृतावादाय दक्षिणा सकृदतिक्रांतोपरेणाघारसंभेदं पंचप्रयाजान्प्राचो यजतिप्रति
दिशं वा । समिधा पुरस्तात्तनूनपातं दक्षिणतः इडः पश्चाद्बर्हिरुत्तरतः स्वाहाकारं मध्ये सर्वान्वैकध्यमाश्रावमाश्रावं

१०

त्वा आविते समिधो यजेति प्रथमं संप्रेष्यति यज यजेतीतरानिति । मानवे च घृतवती अध्वर्यो स्रुचमास्यस्वेत्यादाय
दक्षिणातिक्रामतीति । अत एवास्माभिर्घृतवती । मित्येतस्मिन्ये हेतुक्ते इति व्याख्यातं । पंच प्रयाजान् । सकृदति
क्रांत एव पंच प्रयाजान्यजति । प्रयाजानिति संज्ञा आप्रयाजेष्वित्यस्मादौ संव्यवहारार्था । ऋतवो ह वै प्रयाजास्तस्मा
त्पंच भवंतीति श्रुतेः पंचेत्युक्तं । पंचग्रहणात्पंचैतानि कर्माणीति ज्ञायते ॥ ॥ समिद्धतमे । एतान्पंच प्रयाजा
न्समिद्धतमे अतिशये न समिद्धे वह्निप्रदेशे जुहुयात् । यत्रो एव समिद्धतमं मन्येत तत्राहुतीर्जुहुयात्समिद्धहो
मेन त्वेव समृद्धा आहुतय इति श्रुतेः । अत एवोक्तमापस्तंबेन । सर्वाग्नेरेकदेश इति । सर्वानपि प्रयाजानेकस्मि
न्नेव स्थाने जुहुयादित्यस्यार्थः ॥ ॥ यज यजेति शेषं ॥ ॥ समिद्धो यजेति प्रथमे प्रयाजे उक्तं । शेषं प्रयाज
चतुष्टयं प्रति यज यजेत्येव प्रैषो भवति । अथ यज यजेत्येवोत्तराना हाजामितायै जामि ह कुर्याद्यत्तनूनपातं य
जेहोता यजेति ब्रूयात्तस्माद्यज यजेत्येवोत्तरानाहेति श्रुतत्वात् ॥ ॥ अवतिष्ठन् । अध्वर्योर्निष्क्रमणं । स्थिर एक
स्मिन्नेव स्थानेस्तेन मध्ये वतिष्ठन्पंच प्रयाजान्यजति तदा एकस्मिन्समिद्धतमे एव भागे अग्नेः प्रदेशे पंचापि जुहोति
। न माक्रमस्थात् एव यत्रैव तिष्ठन्प्रयाजेभ्य आश्रावयेत्तत एव नापक्रामेदिति श्रुतेः । नापाधपक्रमणाकाल
रणो सत्यपि नापक्रामेदित्यर्थः । पक्षांतरमाह । सर्वं सर्वं वाभिक्रामं । वा विकल्पः । अथ वाभिक्रममभिक्रम्याभि

एम० १०

क्रम्य आह्ववनीपहं सुखं गमनं कृत्वा सर्वे सर्वे वै प्राक्संस्थं पंक्त्या पंचापि प्रयाजान्पृथक्पृथक्स्थाने जुहोति । तस्मा
दभितरामभितरामेव क्रामेदभितरामभितरामाहुतीर्जुहुयादिति श्रुतेः । तस्मात्प्रयाजाः प्राच्योद्धृपंत इति श्रुतेश्च
। तेन ध्रुवपक्षे समिद्धतमस्य वै पंचानामपि होमः । अभिक्रमणपक्षे च पूर्वे पूर्वे मिति प्राक्संस्थं पंक्त्येत्यर्थः । सर्वे प्रज
तिषु होम ईशानादिङ्मुखेन वेदेर्दक्षिणामार्गेऽवस्थितेन च कर्तव्यः । वषट्कारेण सह वा वषट्कृते वेति । तदुक्तं दक्षि
णात्वुदङ्याद्वषट्कृते सह वेति । मनुः । जुहूमुपभृतोऽग्रेणादध्याज्जुह्वे च । दक्षिणे । न दक्षिणातिक्रामति सव्ये
नोदङ् परिधौ संधीनान्यवहाय । आशीमत्तरतो जुहोति स्वाहाकारवती वषट्कारवती दक्षिणातः प्राङुदङ्
त्वरूर्ध्वा क्षिप्यन्नाश्रावयन विवेषेदाशोमास्मभ्यमिति वषट्कारं वषट्कृते जुहोतीति मद्रेण स्वरेणायमाणाभ्यां प्रच
रति मध्यमेनानुयाजेभ्य उत्तमेनाशिषो हितेति ॥ ॥ उपभृताज्जुह्वामानयत्यनंतरं शेषमनुयां । उपभृति प्रगृहीतस्य
मध्ये द्वौ जुहूषप्रयाजार्थेन चतुर्थं प्रयाजं प्रसुपभृतः सकाशात्स्वमानुयं जुह्वामानयति आसिंचति । किं कुर्वन्नु
नवमृशन् । उपभृताज्जुह्वाः स्पर्शमकुर्वन् । अथ चतुर्थे प्रयाजे समानयन्निति हविषीति प्रकृत्य सर्वा अनवमृशं
मानयतीति श्रुतेः । अत्राहापस्तंबः ॥ ॥ त्रीनिष्कासाद्धमोपभृतस्य जुह्वामानीय प्रत्याक्रम्य शेषेणाध्रुवामभि
घार्यानुसर्वैहवींष्यभिघारयेत्सुपभृतं मंत्रत इति । काठको । त्रीनिष्कासाद्धमोपभृतस्य जुह्वामानीय प्रत्याक्रम्य शेषेणा

११ ध्रुवामभिघार्यानुयाजार्थंहवींष्यभिघारयंस्तूपभृतंभवतइति। काठके। त्रीनिद्धिमुपभृतस्यार्द्धंजुह्वामासिच्यतेनोत्तराविहृत्वा
ध्रुवायास्याम्याभिघारयतिध्रुवा०॥ हवींष्यप्यमतिशेषमिति॥ ॥एवंप्रवृद्धौ। प्रयाजप्रवृद्धावेवमेवसमानयनंकार्यमि
वमितिचतुर्थेचतुर्थेइत्यर्थः। तथैवकृतत्वात्॥ तथाहिवरुणप्रघासेषुचतुर्थेचतुर्थेप्रयाजेसमानयमानोनवभिः
प्रयाजैश्चरतइति। पशावपि। चतुर्थेचतुर्थेप्रयाजेसमानयमानोदशभिः प्रयाजैश्चरतीति। ततश्चैवं। चतुर्थेस
प्तमदशमेषुसमानयनमिति॥ ॥अनुयाजेषुच॥ ॥अनुयाजेष्वपिप्रवृद्धौएवंज्ञेयंचतुर्थेचतुर्थेसमानयनंका
र्यमित्यर्थः। तत्रापिरूपं। वरुणप्रघासेषुतावत्। चतुर्थेचतुर्थेनुयाजेसमानयमानोनवभिरनुयाजैश्चरतइति
। पश्वनुयाजेष्वपिचतुर्थसप्तमदशमेषुअर्वाक्समानयनं॥ ॥उत्तरांजुहूमभ्युत्यप्राचीमवहृत्यजुहोति। जुहूमु
त्तरामेवोपरिमार्गेणैवप्राचीमवहृत्यउपभृदग्रेणावहृत्यानुजुहोतिप्रथमंप्रयाजं। पुनरप्यध्युत्यतेनैवमार्गेणो
पभृतमुपरिनिधायपुनस्तथैवावहृत्यजुहोतिएवंप्रतिप्रयाजं। नसकृदवहृत्यसर्वानिति। अथातोहोमस्यतदे
तेऽकेकुशलंमन्यमानाःप्राचीं स्रुचमुपावहृत्यहुत्वापर्यानिति। अहृत्योपभृत्यधिनिदधतीतिमतिन्यायपार्श्वतउ
हैकेस्रुचमुपावहृत्यहुत्वापर्यावृत्योपभृत्यधिनिदधतीत्येकपक्षमुपन्यस्यनतथाकुर्यादितिइदानींदर्शनाद्दृष्टमेककु राम० ११
र्यात्प्राचीमेवस्रुचमुपावहृत्यहुत्वातेनैवाधिहृत्योपभृत्यधिनिदध्यादितिस्वपक्षस्थापनात्। तेनोपभृदग्रप्रदेशेनैवजुह्वा

अवहरणस्याधस्तेनकार्येनपार्श्वमार्गेणेतिसिद्धं। अतएवोक्तंमनुना। जुहूमुपभृतोग्रेणावधौघाद्वृद्धयेचेति। आपस्तंबोपि
। मुखतोभिहृत्यमुखतउपावहरतीतिसर्वत्रैवमत्याधानोपावहरणेभवतोनन्तसंधिंजयतीति॥ ॥एवं०सर्वत्र। न
केवलंप्रयाजेषु। सर्वत्रसर्वहोमेष्वेवंज्ञेयं। यतोहोममममात्रेमहत्वंसृज्यते अथातोहोमस्येति। नप्रयाजानामेकस्य। तस्मा
त्सर्वत्रजुह्वा अवत्ताहरणाधस्तेनप्रतिहोमंभवतएवप्रयाजेष्वन्यत्रचेतिसिद्धं॥ ४॥ नाभिदेशेधारणं। अध्वर्युर्नाभिदे
शस्थनाभिसमीपेस्रुचौजुहूपभृतौधारयेत्कुर्यात्। अथातोधारणस्येतिप्रकृत्याचाहेषमध्यमःप्राणस्तस्माद्द्युतमुप
न्यन्येवेनधारयेदितिश्रवणात्। वषट्कारान्तेहोमविधानादावषट्कारान्प्रतीक्षणीयंतत्रानियमेनस्रुचोद्धरणेप्राप्ते
नियमोयंनाभिदेशेधारणमिति। प्रगृह्यबाह्वोःस्रुचोद्धरणं। बाहत्वात्तत्सूत्रितं। एवंमन्त्रब्राह्मणोत्तदुतथानकुर्यादित्ये
वंनिषिद्धःपक्षः सर्वत्रार्थवादाज्ञेयाः॥ ॥प्रयाजानुमंत्रणं॥ ॥अभिधास्यतइतिशेषः। प्रयाजानांप्रत्येकमनुमं
त्रणंअभिधास्यते। तदेवाह॥ ॥एकोममैकातस्ययोस्मान्द्वेष्टियंचवयंद्विष्मइत्येवंमिथुनैर्यथासंख्यं। एकोममेका
तस्ययोस्मान्मित्येवंमिथुनैः एवंप्रकारैर्यथासंख्यंमिथुनैः स्त्रीलिंगपुल्लिंगशब्दवद्भिर्मंत्रैः क्रमेणप्रयाजानमनुमंत्र
णंकरोति। किमुक्तंभवति। यथाएकः एकेतिमिथुनंप्रथममुक्तं। यथासंख्येमिथुनैरित्युक्तत्वाद्वंशच्छद्वौ। द्वे।
त्रय। स्तिस्रः। चत्वारः। चतस्रइत्येतदुक्तंभवति। तथैवक्रियते। तस्मात्प्रथमेप्रयाजइदंब्रूयात्एकोममैकातस्ययम

१२

हं द्वेष्मीति पंचसु तद्व्याख्यायोस्मांद्वेष्टि यं च वयं द्विष्म इति नू पाद्वौ मम मेति द्वितीये प्रयाजे द्वे तस्य योस्मांद्वेष्टि यं च वयं द्विष्म इति
त्रयो मम मेति तृतीये प्रयाजे तिस्रस्तस्य योस्मांद्वेष्टि यं च वयं द्विष्म इति च चत्वारो मम मेति चतुर्थे प्रयाजे च तस्रस्तस्य योस्मांद्वेष्टि
यं च वयं द्विष्म इति॥ ॥ न तस्य किंचनेति पंचमो। पंचमे प्रयाजे पंच मम मेत्यस्यानंतरं न तस्य किंचन योस्मांद्वेष्टीति मंत्र
णानुमंत्रणं कुर्यात्। पंच मम मेति पंचमे प्रयाजे न तस्य किंचन योस्मांद्वेष्टि यं च वयं द्विष्म इति श्रुतत्वात्। एतच्चानुमं
त्रणं तस्मानंतरं हविः प्रक्षेपे वक्ष्ये कर्तव्यं। यागा ग्रमंत्रवर्णिकोभ्यः समिदादिदेवताभ्यः कार्ये। प्रथमे इदं समि
द्भ्यो न मम एको मम मेत्यादि। द्वितीये इदं तनूनपाते नराशंसाय वा। न मम द्वौ मम द्वे तस्येति तृतीये इदमिड्भ्यो न मम त्र
यो मम मेत्यादि। चतुर्थे इदं बर्हिषे न मम चत्वारो मम मेत्यादि। पंचमे इदमाज्यपेभ्यः सोमायाग्नये ग्नीषोमाभ्यामग्नीषोमा
भ्यां देवेभ्य आज्यपेभ्यो न मम पंच मम मेत्यादि। अमावास्यायां तु इदमग्नये ग्नीषोमाभ्यामिंद्राग्निभ्यां देवेभ्य इति संनयतः
अग्नये विष्णवे इंद्राग्निभ्यां देवेभ्य इत्यसंनयत इति॥ ॥ त्विषिमानपचितिमान्यशस्वी ब्रह्मवर्चस्यन्नाद इति च।
चकारः पूर्वोक्तानुमंत्रणैः सहसमुच्चयार्थः। यथासंख्यमित्यनुवर्त्तते। त्विषिमानसीत्यादिभिः पंचभिर्मंत्रैर्यथा
संख्यं पंच प्रयाजाननुमंत्रयते। प्रथमेन प्रथमं। द्वितीयेन द्वितीयमेवमापंचमादिति यथासंख्यार्थः। प्रथमं
प्रयाजमनुमंत्रयते त्विषिमान्भूयासमित्यपचितिमान्भूयासमिति द्वितीयं यशस्वी भूयासमिति तृतीयं ब्रह्मवर्चसी भू

एम°
१२

यासमिति चतुर्थमन्नादो भूयासमिति पंचममिति श्रुतत्वात्। अत्र साकांक्षत्वाद्भूयासमिति प्रतिपदमध्याहारः। त्विषि
मान्भूयासमिति पंचममिति पंचममिति श्रुतत्वात्। सेयं सूत्रश्रुतोपपत्तिरेव। ब्राह्मणोक्तक्रमानामामन्त्राणा
मंत्राणामादिमात्रेण निर्देशो घटत एव। व्यवहितानामपि चानुमंत्रणानां पाठादेव क्रमः समुच्चयश्चाकरणात्ता
त्। पूर्वस्मादनुमंत्रणादिदं भिद्यते। पृथग्विधानात्। प्रयाजनेषावसानं द्वयोः प्रयोगः। अनेन यजमानके तु क्रत्वर्थ
त्वादनुमंत्रणमकरणं च करोति। तत्र एको मम मेत्यादावूहाभावः। आशीर्योगाभावात्। त्विषिमानित्यादौ तूहो भव
ति आशीर्योगात्। त्विषिमंतौ भूयास्वेति द्वियजमानके। त्विषिमंतो भूयास्मेति बहुयजमानके। एवं सर्वत्रैकेचि
त्तु एको मम मेत्यादिष्वपि एकश्चा च योरेको स्मान्कामित्येवमनेकयजमानकं यथायथामूहमिच्छंति। एक एव चानु
मंत्रणं करोति। अन्ये द्वे नैव सर्वैः प्रत्येकमनुमंत्रणं कार्यं तस्मिन्पक्षे त्विषिमान्भूयासमित्यत्रापि ऊहाभावः॥ ॥
आगंतृणां चतुर्थपंचमाभ्यां प्रत्यासन्नस्थानात्। चातुर्मास्येषु पशौ च प्रयाजप्रवृत्ते चतुर्थपंचमयोरंतराले आगंतवो द्वा
दश प्रयाजा इज्यंते। तत्रानुमंत्रणाद्दौ मा भूदित्यादि धर्मजातं प्रति संदेहः। आगंतृणां किं यस्य कस्य चित्प्रयाजस्य धर्मा
उत नियम इति। किं तावत्प्राप्तं प्रयाजत्वसामान्यस्याविशेषाद्यस्य कस्य चिदिति प्राप्त आह आगंतृणामिति। आ
गंतृणां प्रयाजानां चतुर्थपंचमाभ्यां प्रयाजाभ्यां सकाशाद्धर्मा भवंति। यत यत स्थानात्। के मादि संपर्थे॥ यतश्चतुर्थ

१२

पंचमयोः मध्ये आगंतवः पृथक्ते। अतस्तत्संनिधानाच्चतुर्थपंचमयोरेव धर्मा आगंतुषु भवंतीति। अतो धर्मापेक्षायां
संनिहितव्यतिक्रमे कारणं नास्ति॥ ॥प्रथमचतुर्भ्यां वा यथालिंगं। अथ वा यथालिंगं प्रथमचतुर्भ्यां प्रथमाच्चतुर्थ्या
आगंतूनां धर्मा भवंति। यथालिंगमिति योनेकदेवत्यस्तस्य प्रथमधर्माः। यस्त्वेकदेवत्यस्तस्य चतुर्थधर्मा इति।
तेन पंचमषष्ठाष्टमानां प्रथमस्य धर्माः। अनेकदेवत्यत्वात्। सप्तमनवमदशमानां चतुर्थस्य धर्माः तेषामे-
कदेवत्यत्वात्। लिंगमेवात्र धर्माणामुपस्थापकं। ननु द्वितीयस्यैकदेवतत्वेन तृतीयस्य बहुदेवतत्वेन लिं-
गस्याविशिष्टत्वात् द्वितीयतृतीयाभ्यां सकाशाद्धर्माणामुपस्थापकं। ननु आगंतुषु कुतो न भवंति। सत्यं। लिं-
गमविशिष्टं। परं तु प्रथमचतुर्थयोरन्यदपि कारणमस्ति। एककर्माध्यम्यामितरस्थानानंतर्यं। अथ सिद्धांतमाह॥ ॥
सर्वान्वोत्तमेनोपायित्वात्। अथ वा सर्वानागंतूनुत्तमेनोत्तमप्रयाजधर्मेण संबध्नीयात्। योऽजमेत। कुतः। उपा-
यित्वादागंतूनां। यतस्तत्पंचममुक्त्वा आगंतव उपयंति उपगच्छंति चतुर्थस्तस्य स्थान एव भवति। पंचमे पुनरननु-
ष्ठिते आगच्छंत आगंतवस्तस्य स्थाने भवंति। तत्स्थानाच्च तद्धर्मेणैतेषां प्राप्त्या। अतस्तत्स्थैगतमस्याभ्यामेनावि-
कृतिषु नवत्वे कारणं स्याच्च अप्रयाणां प्रयाजानां पूरणीया। यतः पंच प्रयाजान्यजतीतीयं पंचसंख्या प्रया-
जानामुत्पत्तिशिष्टा। न च प्रयाजान्यजतेत्येकादश प्रयाजान्यजतीतीयं वैकृती संख्या चोत्पन्नशिष्टा उत्पत्तिशिष्टाया

राम॰
१२

अपंचसंख्या प्रयाजानामुत्पत्त्या उत्पन्नशिष्टया नवैकादशसंख्यया बाधायोगाद्वैकृती संख्याभ्यासेनैव पूरणीया। तत्राभ्या-
सेन यद्यपवर्ज्येत्येन्यायात्पंचमस्यैवाभ्यासः प्राप्तो नियतः सर्वेषामभ्यासेन पुनस्तेन तत्स्थाने आगंतूनां यागाभावात्। तस्मात्पंच-
मस्यैवाप्यभ्यासस्तेन तद्धर्मा एवागंतुषु भवंतीति सिद्धांतः। अतस्त्वद्वाः प्रभृतीनां पंचमस्य स्थाने होमः पंचममन-
न्यत्वाघनुमंत्रणं अन्नादो भूयासमिति च सर्वेषां भवति। अभ्यासविनाशेव साभ्यासः पंचम आक्रांते आधर्य-
वंतु स्वाहेति। दाधारकोचार्यः। विनष्टस्यैकैकस्याप्राप्तिरिति पाद्विका॥ अनुयाजेषु सजः सुपजु। मिष्टपजुः सुज्वन्न-
बध्यासु चैवमेव द्रष्टव्यं प्रदश्यामो वेवद्रव्य मध्यत्यासनीयं। अत्र पद्य पिष्टानपयेत्र विशेषेणाक्रांतं अयतनं न पा-
तं यजतीति। परं तु शास्त्रांतरे विशेषः प्रपते। राजन्यात्रिवध्र्यश्वरसिष्ठवैदेयशुनकानां कराव कश्यपसंकृतीनां
नराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामिति॥ एवं मानवसूत्रेपि। तत्राविशेषस्याविशेष विशेष यत्तमेव न्या-
य्यं। तेनैव व्यवस्था। ए राजन्यवसिष्ठादीनां नराशंस एव द्वितीयः प्रयाजः॥ अन्येषां तनूनपादेव। वसिष्ठादि-
कं गोत्रं येषां ते वसिष्ठादय इति केचिदाहुः। अन्ये तु वसिष्ठादिप्रवरवंतो वसिष्ठादय इति। ये तु काश्यपस्य गोत्रेः क-
श्यपप्रवरवंतस्तेषां वनिःसंदिग्धं नराशंस एव भवति॥ ॥एवमनुद्धाभिघारणाद्ध्रुवायामाहरिषत उपभृतश्च। पंच-
प्रयाजहोमानंतरं यजतिस्थानादेतस्य वेदेः पश्चादागत्यापरिश्यनुद्राकरणामृत्यातस्थानेव प्रयाजशेषेण ध्रुवा

पाउतिश्रौवस्याज्यस्य। हविषद्भ्याज्यस्थाल्याज्यस्य पुरोडाशापेक्षा यस्मात्तस्मेसुवमस्कुस्यस्याध्वर्युरभिघारणं करोति
उपयोगक्रमेण। सपजुह्वामाज्यं परिशिष्य मासीदेनयतु ॰ समस्याप्यपुंस्तेनैव यथापूर्वं हवीं॰ष्यभ्यघारयत्रिति
मकुर्यात तस्मादुक्तमेवमपानुमिहत्वा यथापूर्वं॰ हवीं॰ष्यभिघारयतिपुनरेवैनानि तदाधाय पयस्या तथामानि
करोतीतिश्रुतेः। अयं च हविः संस्कारो न प्रयाजशेषप्रतिपत्तिः॥ कुतः। श्रुतिवाक्ये हवींषीति द्वितीयया हविष
संस्कार्यत्वावगमात्। योषेवततीया श्रूयते। तेनैव यथापूर्वमिति। शाखान्तरेपि प्रयाजशेषेण हवींष्यभिघार
यतीत्येवमेव श्रूयते। अतो हविःसंस्कार एव। पुनरेवैनानि तदाध्यापयस्या तथामानि करोतीति वाक्य
शेषाच्च। अतः संनिहितानि सर्वाणि हवींषि विशेषेणाभिघारणीयानि। शेषविनाशे चद्रव्यमात्रमुत्पाद्यतेना
भिघारणीयानि। प्रयाजशेषप्रतिपत्तिरेवेयमिति कर्काचार्याः। मीमांसकाश्च। आज्यभागाभ्यां चरन्त्याग्नेय
नसौम्येन। आज्यभागावित्यनयोः संज्ञा संव्यवहारार्था। ताभ्यामाज्यभागाभ्यां चरन्तीति तावत्तु तिष्ठतो तयोः। द्विदेवत्यौता
वाज्यभागावित्यनयोः संज्ञा संव्यवहाराकांक्षायामाहो। एकेनाग्नेयेन। अपरेण सौम्येन। अग्निर्देवता यस्य तदाग्नेया
असेहक्र। सोमो देवता यस्य तत्सौम्यं। सोमाय घृतं। आग्नेयं द्रव्यं यस्मिन्नाज्यभागे स आग्नेयः। एवं सौम्योपि॥ ॥चतुर
वत्तं॰ सवषट्कारास्तु एव वषट्कारास्वाहुतिषु चतुरवत्तं होतव्यं। तद्दै चतुरवत्तं भवतीदं वा अनुवाक्याथ याज्याथ वषट्कारोयस्मा

देवतायै चतुर्थीयस्यै देवतायै हविर्भवतीत्यादिना सवषट्काराहुतिषु चतुरवत्तमवगम्यात्॥ ॥आनिधायावदायावदायध्रुवा
मभिघारयत्याप्यायतामिति। स्रुचावनिधाय हस्तेध तयोरेवतयोर्जुह्वां कृवात् आज्यमवदाय आप्यायतामिति मंत्रेण
स्रुवाज्जीतो ध्रुवामाप्याययतिपदवत सूत्रयति आज्यभागावितिअन्वर्थसंज्ञयैवाज्यद्रव्यकत्वमवगन्तं। तत्राज्यं ध्रुवाया
एवावदेयं। आहवनीयं यजत योध्रुवायाइतिपरिभाषायामुक्तत्वात्। तेन प्रत्यवहानमनेन सूत्रेण ध्रुवायामाप्यापनं
विधीयते। तत्रावदायावदायेति वीप्साप्रतिस्रुवमाप्यायनविधानार्था। अन्यथा चतुरवदानान्ते सकृदाप्यायनं प्राप्नोति।
तच्च नोपपद्यते मूलक्षयात्। तत्पुरस्तादाज्यभागावग्नीषोमाभ्यां यजतीत्याज्यभागयोर्यजतिनातिष्टहोमावषट्कारप्रदा
नायाज्यापुरोनुवाक्यावत्तो यजतयइत्युक्तत्वाद्याज्यापुरोनुवाक्यावत्त्वां तौ चानुवाक्यायाज्याभ्यांवप्राषितरएवहोताएवतिसंप्रे
षितिभतोन्वाहत्याथयजतीति शाखायनोक्तेः। अतश्चानुवाक्यापाठनाथेमग्नयेनुब्रूहीत्येवं प्रैषस्तत्र्यः। अनुवाचनप्रे
षाययोर्देवतमुष्मा अनुब्रूहीतिपरिभाषितत्वात्। आश्रावणानन्तरं चाग्निं यजेत्येवं प्रैषः कार्यः। तदप्युक्तमाश्राव्या
प्रेषेच्चामुं यजेति। अनुवाक्याप्रैषश्चावदानात्प्रागेव स्थः वक्ष्यमाणघासे अवदानात्पूर्वमेवदर्शनात्। अथाध्वर्युरेवाहाग्नयेनु
ब्रूहीत्याग्नेयमाज्यभागं तावुभावेवचतुरवत्तनाज्यस्यावदायातिक्रामसमतिक्रम्याश्राव्याहाग्निं यजेतिताउभावेव वषट्कृतेजुहुतइ
ति। एवंसर्वयागेष्वपिज्ञेयं। अतश्च सर्वयागानामयं क्रमः। पूर्वमनुवाचनं। ततोवदानं ततोतिक्रम्याश्राव्य याज्यार्थः प्रैषइति

मत्तुवातिनेप्रभुयागे च अवदानोत्तरकालमनुवाचनं तद्वचनात् यथा पुरोडाशयागे वपायागे वा तद्वन्मंथे वारुणयागे सवनीयया
गे त्ववचनाग्रहानुवाचनं अवभृथस्विष्टकृद्यागे च पत्नीयुक्ताः पुरोडाशशेषमवदधतोनुवाचनं तदपि वचनादेव अत्र
मत्रपत्निमात्रे पूर्वस्मिन्नानुवाचनमिति अत्राहापस्तंबः आग्नेयः सौम्यश्चाज्यहविषावाज्यभागौ चतुर्गृहीतान्यां
जमदग्नीनां तु पंचवत्ता मध्यमात्स्यान्यो तामदग्न्यमाहं मंत्रपंचावत्तं कुर्वीत सर्वत्रापघन्नपुष्पा अनुब्रूहीति पुरोनुवा
क्यां संप्रेष्य स्ववद्दापावदाय स्रुक्स्रुवेण प्रस्तरबर्हिः समज्य जुहूपभृतावादाय दक्षिणातिक्रम्य आश्राव्य प्रत्याश्राविते मुप
जेति याज्यामिति तिष्ठावैत्रिकमिति मानवे वा आस्याक्रे स्पाभिघारयति ध्रुवां दक्षिणां पुरोडाशं पुनर्ध्रुवामुष्यां ध्रुवयाजायो
नरं पुरोडाशं सपदोहं प्रात देहिमुपमृतमर्ततः स्फवेणावद्यति चतुःपंचकृत्वो जामदग्न्यस्पष्ठन्यं चावहं त्त जामदग्न्य
मार्थं अकुर्वीतान्यभागोपजतीति अनुब्रूहीति सत्कानामप्याहरेद्धोता चाश्रावणात् अनुब्रूहीत्युक्तो ध्वर्युराश्रा
वणाद्या आश्रावणं यावत्तापव्याहरेत् एतस्मात्सैधादयेतं अतिरिक्तं किमपि न ब्रूयात् सोनुब्रूहीत्येवमुक्तो ध्वर्युन्नीय
आहरेन्नीएवहोतायव्याहरेदिति स्कन्नत्वात् आश्राविते यजेदाप्रत्याश्रावणात् आश्राविते सत्यग्नीत्रापव्याह
रेदाप्रत्याश्रावणात्प्रत्याश्रावणात्परावृत् अस्तु श्रौषडित्येतस्मात्दन्यत्किमपि न वदेदित्यर्थः सोग्नीत्रायमाहुरेदाप्र
त्याश्रावणादिति स्मृतेः अस्तु श्रौषडित्यस्य प्रत्याश्रावणसंज्ञा प्रत्याश्रावणापस्यग्नीदिति वचनात् प्रत्याश्राविते ध्वर्युराहो

तृप्रैषात् आग्नीध्र अस्तु श्रौषडित्येवं प्रत्याश्राविते सत्यध्वर्युर्होतृप्रैषामापव्याहरेत् यजेत्यर्थं होतृप्रैषस्तद्यति
रिक्तं किमपि नव्याहरेदित्यर्थः सोध्वर्युर्नापव्याहरेद्यजेति वक्तारितिश्रुते वक्तोवदमाहित्यर्थः होतावषट्कारात्
यजेतिप्रैषश्रवणानंतरं होता आवषट्कारान्नापव्याहरेत् याज्यावषट्कारव्यतिरिक्तं किमपि न वदेदित्यर्थः सहोता
नापव्याहरेदावषट्कारात् तारादिति स्कन्नत्वात् अत्राहापस्तंबः अन्नपव्याहरन्तः प्रचरेयुः आश्रावयिष्यन्नान्यदाश्राव
णाद्ब्रूयादाश्राविते नान्यदाग्नीध्रः प्रत्याश्रावणात् प्रत्याश्राविते नान्यद्ध्वर्युर्यजेति वचनाद्यजेत्युक्ते होता नान्य
द्वषट्काराद्यस्यद्ब्रूयात्पुनरेवाश्रावयेद्याद्वीजयेदिति प्रसंगादाह सोमेष्वग्रहं गृहीत्वोपाकरणात् सोमेसोमया
गे ज्योतिष्टोमे ध्वर्युर्ग्रहं गृहीत्वा आ तत्स्तरणात्पूर्वं ग्रहमुपस्थाप्य प्रस्तोत्रा उपाकरणान्नापव्याहरेत् उपावर्त्तेध्वमित्य
यं स्तोत्रप्रैष उपाकरणशब्देनोच्यते तस्मादतिरिक्तं किमपि न व्याहरेदित्यर्थः इति नुहविर्यज्ञेऽध्वसोम्येऽध्वरे सवेग्रहं
गृहीत्वाध्वर्युर्नापव्याहरेदोपाकरणादुपावर्त्तध्वमित्येवाध्वर्युरुद्गात्रॄन्प्रत्युपावर्त्तध्वमिति संप्रपद्यतीति उपाकृत्स उद्गातार
आ होतृप्रैषात् ॥ उपाकृते ध्वर्युणा उपावर्त्तध्वमित्येवं स्तोत्रेपाकरणे कृते उद्गातारो नापव्याहरेयुः स्तोत्रव्यतिरिक्तं
कमपि नोच्चारयेयुः आहोतृप्रैषात् एषत्य पंप्रस्तोतश्चक्कर्की होतृप्रैषः। तत्पर्यंतमित्यर्थः। प्रस्तोता हि सर्वेषु स्तोत्रेषु
उत्तमापाहवः प्रस्तावादनंतरं शास्त्रकर्त्तारिप्रैष्यति एषोत्तमेति। तउद्गातारोनापव्याहरेयुरोत्तमायाएषोत्तमेत्येवाद्वा

१६ तारोवेयन्नः संप्रयच्छंतीति। होतावषट्कारात्। होताअत्रवषट्काराणामनापव्याहरेत। शब्दांतरितैः किमपि नव्याहरेदित्यर्थः
। स होता नापव्याहरेदावषट्कारादिति श्रुतेः। होमस्य ग्रहणात् अन्येषामपि शब्दकर्तृणामुपलक्षणार्थं। तेन प्रशास्त्रा
द्यपोपि एषोन्नमेति प्रैषं कृत्वा नापव्याहरेयुरावषट्कारात्। आग्नेयमुत्तरस्य पूर्वार्द्धे आग्नेयमाज्यभागमाहवनी
यस्योत्तरपूर्वार्द्धदेशे न भागं जुहोति। उत्तरार्द्धपूर्वार्द्धे हि आग्नेयमाज्यभागं जुहोतीति श्रुतेः। दक्षिणपूर्वार्द्धे
सौम्यं। सौम्यं देवमद्देवमाज्यभागं। दक्षिणपूर्वार्द्धे आहवनीयस्याग्नेयभागं जुहोति। दक्षिणार्द्धपूर्वार्द्धे सौम्यमा
ज्यभागमिति श्रुतेः। समिद्धतमेवा। अथवा भावयाज्यभागौ समिद्धतमे। तिशयेन समिद्धे दीप्ते ज्वालाहवनीयप्रदेशे जु
हुयात्। यत्रो एवसमिद्धतमं मन्येत तदाहुती जुहुयादिति श्रुतेः। सम्यगिद्धो दीप्तः समिद्धः। अतिशयेन समिद्धः स
मिद्धतम इति। हविर्भ्यां चात्ततीति शेषः। चकारेण समिद्धतमदेशेन नु कृष्यते। हविर्भ्यां च समिद्धतम एव अद्विप्र
देशे प्रचरेति। यत्रा एवसमिद्धतमं मन्येत तदाहुती जुहुयात्। समिद्धहोमेन त्वेव समृद्धा आहुतय इति श्रुतेः। पुरोडाशा
वंतरेणाग्नीषोमावुपांशु आज्यस्य। पुरोडाशावंतरेण पुरोडाशसाध्ययोर्यागयोरंतराले मध्ये आज्यस्य द्रव्यस्योपां
श्वग्नीषोमौ यजति। अंतरेण युक्तं निपातो मध्यार्थः। तद्योगे च। अंतरांतरेण युक्ते इत्यनेन पुरोडाशावित्युपपदवि एम०
विभक्तिर्द्वितीया। ततश्चायं क्रमः। पूर्वभागे नयमाज्यभावो ध्रुवायाः स्रुवेणाज्यं गृहीत्वोपस्तीर्णः। आज्यस्थाल्याः स १६

काशात् ध्रुवाया अभिघारणं। ततः पुरोडाशमध्यादंगुष्ठपर्वमात्रंतिरश्चानमवदानं यावद्यं। द्वितीयं स्रुवोद्धीनं। पंचाव
त्तिनस्तृतीयं पश्चार्द्धात्। ततो ध्रौवेणोपस्थमभिघारः। पुनर्ध्रुवाया आप्यायनं। आज्यस्थाल्या आज्येनावदानस्य हविषो
वदीनयोः प्रत्यभिघारः। अतिक्रम्याश्राव्याग्नियजेन्विका वषट्कृते सह वाक्यकार्मेन होमः। तत आज्यभागव
क्षवात ध्रुवांनु पंचवत्तोचो वा अवदायो पांशु याजः। अंततः आग्नेययागवद्वितीयेन पुरोडाशेनाग्नीषोमीययागस्तत
: स्विष्टकृदिति। त्वराद्रापस्तंबः। स्रुचावाहत्ते न निदध्यात् स्विष्टकृत आज्यभागावंतरेणाहुती जुहोतिप्र
त्याक्रम्य जुहूमुपस्तीर्य मेरैरित्याग्नेयस्य पुरोडाशस्य मध्यादंगुष्ठपर्वमात्रमवदानं तिरश्चीनमवद्यति स्रुवोद्धी
द्वितीयमनूचीनं चतुरवत्तिनः। पश्चार्द्धात् तृतीयं पंचावत्तिनः। ऽहं भिंदन्मांसमहृदि ताभ्यामंगुलीभ्यामंगुष्ठेन च पुरो
डाशस्यावद्यति स्रुवेणाज्यमाप्यायोरिति तथास्त्रवदाम्यान्यामिघार्यपिहविः प्रत्यभिघार्याग्नयेनुब्रूहीत्यभिपते
तिसंप्रैषाविति तथापवदावोताविलेलापंज्जीवाग्निस्याहुतीं जुहोति आज्यस्य विरूपांशुयाजः पौर्णमास्यामेवभव
तिवैष्णवाग्नीषोमीयः प्राजापत्यो वा प्रधानमेवेयोपांशु विष्णुं बुभूषन्यजत्यानीषोमौ भ्रातृव्यवानाग्रयेपङ्क्तौरे हवि
र्भिर्यथादेवतं प्रचरति स्म अवदापदोहाभ्यां इत्रोस्थायपंच तस्या घसेतच्चाविपरीतं सर्वाणि त्रवाणि स्रुक्सु स्रुवेण जुहो
तीति मानवेच उपस्तीर्य दक्षिणस्य मध्यात् संहताभ्यामंगुलीभ्यामंगुष्ठेन चांगुष्ठपर्वमात्राण्यवदानान्यवद्यतिम

ध्यास्त्वोर्द्धो द्वितीयं पश्चार्द्धो वृतीयं यदि पश्चावदानः स्यात्तत्तमभिघार्य पुरोडाशं मध्यमभिघार्य प्रतिअग्नये नुब्रूहीत्यनु
वाच्य यान्या श्राव्याग्निं यजेति प्रेष्य ज्यंतशुद्धभागा वाहुती गोगुदीचीर्याप्यातपति प्रोवस्यावद्यो पांशुयाजाद्यग्नीषो
मीयं पौर्णमास्यां विष्णवममावास्यायामुपांशुपा ः भुदेवजे निर्दिशत्य मुत्तरस्यार्द्धीमद्यथोद्दिष्टं प्रचरति हंन्नपन्न
उपसीयेयथावदानं तत्समवद्यतिपुरोडाशस्य दोहयोर्म्वेन्द्राया नुब्रूहीत्यनुवाचयति मर्हेन्द्रायेति वा सांनाय्यस्य पुरो
डाशानां याज्ये नजुहुयाद्वा एतां प्रश्नस्त्र वरोश्मारव्यातंम वरंज्ञामिति ।। विष्णुर्वोमावास्यायां होत्राम्नानात् अमा
वास्यायां विष्णुर्वो उपांशुयाजस्याज्यया जस्य देवता भवति अग्नीषोमौ वेति कुतः होत्राम्नानात् एवं हि होत्रे आम्ना
यते वैष्णवम्प्रे दिर्हवषट्कृते विष्णवा स्थितिया ज्यापुरोनुवाक्येइति अथ त्रितीयं विकल्पः हेतया तोग्नीषोमौ अ
संनयतो विष्णुरिति होत्रबोधेव तथा दर्शापस्तंबः अमावास्यायां पुरोग्नीषोमीय यांशुयाजो वैष्णवो वाग्नीषो
मीय एव पुरोडाशः यौर्णमास्यां शिषिर्णिं हाग्नेया सन्नय वोद्धितीया माबास्यायामैंद्रं सांनाय्यं संनयतो माहेंद्रं वा
वैष्णवं तत्सम संनयन्नुयांशुयाजमिति असंनायां समनुवर्तते तु शब्दो व्यवच्छिन्नत विकल्पार्थः तेनामावास्यायां सान्नाय्यपाजि
नोग्नीषोमाविज्येति असान्नाय्य याजिनो विष्णुरिति आम्ब्रायनो यत्रावाहने अग्नआवहेति तु प्रथमदेवतामग्नि
सोममित्याज्यभागाद्ग्नीमग्नीषोमाविति पौर्णमास्यामाग्नीषोमयोः स्थाने इंद्राग्नी अमावास्यायामसंनयतः इंद्रम

हेंद्रं वा संनयतोन्तरेणाद्विषो विष्णुमुपांश्वेतरेणापि णाग्नीषोमीयं पौर्णमास्यौर्वै वममावास्यायामैकै नैकैकं वनेतित
या उपांशुयाजधर्माः शांखायनेनोक्ताः गणावोपेयज्ञामहोत्र वषट्कारः एषैषा प्रैषा ध्यो के रूपां शुहविः षु देवतानाम
धेयं वोपांशिति तपटुपांशु उपांशुकुर्वत्येके नैक इति श्रुतेरुपांशुयाजस्यविकल्पः अतएवाश्वलायनेनोक्तं नैकेकं
वमन्ति शांखायन ब्राह्मणे चाविशेषः अथयदमावास्यायामिंद्राग्नीयजतिप्रतिष्ठे वा इंद्राग्नी प्रतिष्ठित्या एवा सं
नयंनमावास्यायामिंद्रं यजतिन्तमोतिवोमावास्यान्ह्यत्र चंद्रोनद्रश्यते अथयदसंनयत् पुरोडाशं तरेणोयां
श्वाशुस्य यजत्यसन्नमिताया अथयदसंनयंग्नोनाश्ययां तरेणोपांश्वाज्यस्य यजतितस्यात्तु ब्राह्मणामिति मान
वेच धौवस्यावद्योपांशुयाजमग्नीषोमीयं पौर्णमास्यां वैष्णवममावास्यामिति अतोमावास्यायामप्युपांशुया
जो भवति पावद्गविरुतरार्द्धात्स्विष्टकृतः पवद्दविरिति यावंतिहवींषि भवंति तेषां हवीषामुत्तरार्द्धादुत्तरस्मात्प्रदे
शात्स्विष्टकृतः स्विष्टकृद्भागाथमवद्यति तस्मात्प्रत्येक स्वदेवताये हविर्गृह्णीते सर्वेभ्यो स्विष्टकृदवत्तं भवत्विति
श्रुतेः सकृत्सर्वेषामेवहविषामभ्यर्थेः सकृत्सकृदवद्यतीति विकृतावत्तदाच्च तत्र जमदग्नीनां द्वेअवदाने
इतरेषामेकमिति पक्षमस्तवायं स्विष्टकृतद्रुतिपरिभाषितत्वात् स्विष्टकृतोवदानमेकं प्रत्यवायं प्रधानयागा
वदानसंख्यातएकेनमन्तं भवतितेन सप्तप्रधानयागेष्वग्नीषोमवदानानिततस्विष्टकृतिद्वे यस्य प्रधानस्य यागे

१८ द्वेऽवदाने तस्यात्रैकमिति अभिघारणं चोपरिष्टाद्विर्भवति द्विर्भागाभिघारणमित्युक्तत्वात् अत्र सर्वेषां हविषामुत्तरार्द्धे
स्ववदापस्यहैवैकं प्रदानेकमेवं नद्य व्याभिदेशुणं यागादिशाभ्यामुतिसत्वात् द्व्यस्यपुरोडाशाम्नाय्यादेर्भेदेपिद्ववत्तं
यांसमानापामवदानं प्रदानानां तंत्रं भवति किंतु सर्वेषां सहैवैकशवदायस्कृदेवयोगानुष्ठेपदस्यस्यसूत्रस्यार्थः
प्रतिपदार्थकमेवैतत् हविषामुत्तरार्द्धैः प्रतियाघतेपागम्भेक्रियत इति अतएवभाष्यकृतोक्तेपि स्विष्टकृद्यागो भवति
ततएवहोमः ततइत्यग्नेरुत्तरार्द्धेएव स्विष्टकृदवदानानां होमो भवति सर्वाननुत्तरार्द्धादवद्यत्युत्तरार्द्धे जुहोतीति श्रुतेः शे
षास्विष्टकृदाने प्राप्तेआह नाज्यशेषात् ध्रौवादाज्यस्विष्टकृतानावद्यति अतः अशेषात् नह्येतद्ध्रुवायां स्युयाज
स्पशेषः सर्वार्थत्वात् तथाहि यस्यपात्राभिघारस्य नाज्यपजनस्युवायां गृह्णातीति अपरा व्याख्या आज्यास्वि
ष्टकृतो नावद्येयं कुतः अशेषात् नह्याज्यं शेषरूपमस्ति शेषस्य हि कृतार्थस्य प्रतिपत्त्यपेक्षस्यापि हितस्य प्रतिप
त्त्यर्थो निःशेषाकार्यामिति न चाज्यमेवंविधं विधमस्तिनह्युपांशुयाजार्थमत्यर्थं एष कृमकस्वितमस्तियस्य
शेषो भवतिः अतः साधारणादेव ध्रौवादाज्यचनेनोपांशुयाजार्थं गृह्यते यत्तावत् ध्रुवायामुपांशुयाजार्थं गृहीत
वशिष्टमाज्यं ततस्याहारणस्याभिघारणाद्युपयोगोस्यकृतार्थेन प्रतियत्स्वहैः सर्वानेच्चनेनिःशेषेणाभिघारय राम० १८
जुहूयतइतिनततः शेषकार्यं यत्तुजुह्वां चतुर्गृहीतं तन्निःशेषंकृतमिति शेषाभावोदवत्तसंबंधिकार्यस्याभावः अस्मास्तं

संसृष्टामाहुतिभिः स्विष्टकृदाहुतिं जुहुयादिति शेषः स्विष्टकृदाहुतिमितराभिराज्यभागप्रधानाहुतिभिः सहासंसृष्टामसं
सृष्टां जुहुयात् समानत्र अभ्यर्द्धे द्रवत्तराभ्य आहुतिभ्यो जुहोतीति श्रुतेः अभ्यर्द्धः पृथगर्थः संसृष्टदृत्यर्थः अत्राहापस्तंबः जुह्वामु
पस्तीर्य सर्वेषां हविषामुत्तरार्द्धात्सकृत्सकृत्स्विष्टकृतेवद्यतिद्विः पंचावत्तिनोद्वैवत्तःसौविष्टकृतेऽवचतुर्द्धाकरणेकाना
मुत्तरमुत्तरं ज्यायो द्विरभिघार्य हविः प्रत्यभिघारयत्याग्नये स्विष्टकृतेवद्यतिद्विः पंचावत्तिनो द्वैवत्तं सौविष्टकृतं
इचतुर्द्धाकरणेकानामुत्तरमुत्तरं ज्यायो द्विरभिघार्य न हविः प्रत्यभिघारयत्याग्नये स्विष्टकृतेनुब्रूह्यग्निं स्विष्टकृतं
यजेति संप्रेष्योत्तरार्द्धपूर्वार्द्धे जुहोति असंसक्ताभितराभिराहुतिभिरिति एवमग्न्याधानेपि ३ निध्मयसंचरमभ्यु
क्ष्य प्राशित्रमवद्यति यवमात्रं पिप्पलमात्रं वा स्विष्टकृद्धोमानंतरमपरस्य प्रपलत्वौ निधमपस्थाने प्राशपि ज्या ततः
संचरं होमार्थमगमनागमने मार्गमग्रिरभ्युक्ष्य प्राशित्रहरणे प्राशित्रमध्वर्युर्द्विरवद्यति तच्च पुरोडाशस्य मध्यादव
मात्रं यवप्रमाणं पिप्पलमात्रं वा विपि प्पलप्रमात्राणं वावद्यति परिधीनपरेणासंचरो होष्यत इत्यपसंचरः तस्याभ्यु
क्षणमनुयाजार्थे यतः स्विष्टकृतं परमनेन संचरेयणमनुयाजार्थमेव अतः करिष्यमाणप्रयोजनत्वादनुयाजा
र्थे तेनैव युक्तं अतोनुयाजाभावे आतिथ्यापशस्सपत्न्यामग्नेमेधीयाहोमसंचराभ्युक्षणं न भवति पशौ च अंगास्विष्ट
कृद्यागानंतरं संचराभ्युक्षणं सुसापांचरती यस्मिंवनसंबंधि सवनीयपुरोडाशस्विष्टकृदनंतरं संचराभ्युक्षणं प्राशित्र

१९ ब्रह्मणो भागस्तं द्विरवद्यति सकृदाज्यस्योपस्तीर्य द्विर्हविषोवदायाथोपरिष्टादाज्यस्याभिघारयतीति श्रुतेः अन्यतरात्रं
आसे तस्य पूर्वोक्तस्य प्राशित्रस्यान्यतरत आज्यं भवति उपस्तृणाति वा अभिघारयति वेति स प्राशित्रमवद्यती
द्वैगायत्रेणत्वाछंदसेतिप्रतिमंत्रं एकैकेनमंत्रेणैकैकस्मिन्नाध्ये परिगृह्णातीत्यर्थः तेनगायत्रेणेति दक्षिणा
तोदक्षिणतोदक्षिणार्धेनिहतकोणादारभ्यपुरस्ताद्वेदिमध्यपाश्वस्फ्येनलेखांकरोति ततस्त्रैष्टुभेनेतिपश्चा
त्परपार्श्वेविदिंपरिगृह्णातिपुरस्ताद्वेदिमध्यंयावत् सर्वेत्रिपूर्वपरिग्रहंपरिगृह्णातितथागायत्रेणत्वाछंदसाप
रिगृह्णामीतिदक्षिणतस्त्यादिश्रवणात् छंदोभिराभितः पर्यगृह्णान्निति आभितः समंतात् तथाप्यातित्रिषुदिक्षिवति

दृष्टत्वंअग्निंपुरस्तात्समाधायेतिवचनादितिहरिस्वामिनः तेनांशसंपर्यंतेसावापरिग्रहणेकार्ये वेद्यांत्रिरुल्लिख्याहरद्
त्रिति वेद्यांवेतिदिग्मध्येत्रिरुल्लिख्य पश्चात्तिस्रोलेखाप्राचीरुदक्संस्थाउदीचीर्वाप्राक्संस्थाः तत्राग्नीधंप्रत्युध
पुराहरबुद्धीतिहरत्त्रिरिलेवस्याग्नीत्रेषाः संमृशति अग्नीदेवंवेधिः सनन्तांन्योलखाभ्यः यांसुल्लिहेचोत्करे
प्रक्षिप्यतदनन्तरंलेखाः संमृशतिस्पर्शनेनसमीकरोति पितृयज्ञाग्निचित्ययोः एतदुक्तंलेखाकरणाहरणत्रिरि
तिप्रैषाग्नीधस्त्रिर्हरणंसमर्शनंपितृयज्ञाग्निचित्ययोरेवभवतीत्येवंश्रुतत्वात् नदर्शपूर्णमासयोःश्रुतत्वा
दितितथाहिपितृयज्ञेतावत् एततत्रवमाकृत्वंचपञ्चहोत्रीतिप्रथमस्यपर्वणःव्रियेहरणावरिग्नत्यलिखतिहरतिप
हार्यंभवतीतिश्रूयते अग्निचित्सायामपि अथमापणीयंनिर्वपतितस्याहविष्प्रतापार्चंविसृजेत्स्यस्तंवपजुहू
रतिस्तंवपजुहुत्वा दर्वेणापरिग्रहेणापरिगत्याल्लिखिच्छाहहरतित्रिरितिहरतित्रिरग्नीध्रइति अतोत्रैवचदृष्टपंतेत
त्रैवभवंतीतिसाधूक्तंपितृयज्ञाग्निचित्ययोरीति ततश्चतयोरेवंपदेशतसंस्कारार्धकंवचनाद्द्विर्विप्राप्तेश्रा
हं अतत्रदर्शनादत्र नाशङ्कःपूर्वेपक्षानिरासार्थः नपितृयज्ञाग्निचित्ययोरेवैतत्संस्कारार्धकंकिंतर्हित्रि
त्र दर्शपूर्णमासयोर्भवति कुतः तत्रप्रज्ञातितामापानांदर्शनंमेव नतुविधीनं कुतः वाक्यस्यान्यपरत्वात् एम०
कथमन्यपरतापितृयज्ञेतावत्तस्यपक्षोपवीतीम्भूवाज्यानिग्रहातीति आज्यग्रहणाययज्ञोपवीतित्वमिविधाना

दे·भा·दि कर्मणामंगत्वात्तत्रपरिग्रहादिकरीमादौसंस्यवहाम्यथोपूर्ववदितिस्फ्येनदक्षिणतः पश्चादुत्तरतश्चेति प्रतिमंत्रमित्येतां
यिप्रिदुत्तयत्रपाणांमंत्राणांमप्रतीकाख्यातत्रणादिनाध्रुवंतेनन्त्रापेनमंत्रांतत्र्ज्ञापनार्थं इतस्थापुरक्षमावासिशि
वावेत्तत्रापिकात्समाप्तिःसंभाव्येततत्रपाणांप्रतीकोपादानेवत्ततेण्यसंदेहोनभवति पुराक्रूरस्सेत्यनुमार्ष्टि पुरा
क्रूरस्येत्यनेनमंत्रेणास्फ्येसवेदिमनुपार्ष्णिसमीकरोति तांप्रतिमार्ष्टीतिश्रुतेः प्रतिपूर्वंक्रियाविपर्ययेवर्तते पू
वेदेनतानिखमीनता अधुनातांसमीकरोतीत्यर्थः अत्राहमनुः पुराक्रूरस्येतिस्फ्योविदिप्रतीचीमनुमार्ष्टीद
ति आपत्तंवक्ष्यमतीवेदिंस्फ्येनयोयुज्यते इतितैत्तिरीयसूत्रेच अथप्रतीचींवेदिंस्फ्येनयोयुप्यत इति तेनपुरस्ता
दारभ्यप्रत्यक्संस्थमनुमार्जनंकार्यं स्वसूत्रेतौसूत्रेचविशेषानुपदेशात् यथाकामस्यानुमार्जनास्मात्वेदेः पुरीषंनिः
स्कास्योत्करेप्रक्षिपन्नस्माद्वश्यातुरीयमानीयंदिःप्रहरणीया ततोनुमार्जनेनसमीकरणमिति अथाधिवेदि
प्रोक्षणीहार्यस्यपसनः अध्वर्युरित्स्याग्नीध्रोध्वर्युधिवेदिवेदेरुपरिस्थापसमीपस्थानीयेः प्रोक्षणीर्हरपति
पूर्वेत्युक्तमसंचरेप्रोक्षणीनिधायेतिनातएवेदानींतत्तत्वाद्योवेदेरुपरिष्टाद्धारपति अथस्फ्यामुधमादप्रो
क्षणीरासादयेध्मंबर्हिरुपसादयस्रुवंस्रुचःपत्नीमंनेत्यानुपेनोदेहीतियदीष्टेत अध्वर्युर्यदिप्रैषवचनमि एम०
छेत्तदाप्रोक्षणीरुवेदिमध्येग्नीधाधायमिरणसुवेदेः सफ्याशायमुधम्यहस्तेनोदृत्यावाग्नीधंप्रतिप्रोक्षणीराहा

परं वचनं पतः कर्मणः पित्र्यत्वेन प्राचीनावीतित्वमेव प्राप्नोति तन्नवचनाद्यज्ञोपवीतं विधीयते अन्यस्तं वयत्तुर्हरणा
दि सर्वं प्राक्तमेवानूघते अग्निविसर्पाणामधिमहावेदेः स्फ्यादिसंमार्जनात् स्वकर्मणो बर्हिर्विधानार्थं विवरणं तत्र हरणोपमि
कपाले देशोपवसंख्यात्सर्वेहनिष्क्रयादानादिकर्मप्रज्ञानितः प्राप्नोति प्राग्रहणीयहविष्कृदं तेव वचनेन विधीयते अ
दत्तस्त्वमत्ततितः प्राप्तानां दर्शनमेव न विधानं अतो दर्शपूर्णमासयोरपि लेखाकरणमेव हरणांसमर्शनानि
भवंतीति सिद्धं वह्न्याम घासेषु हरति त्रिरिति सर्वधे पारेयः आपस्तंबस्तोनान्नमाद्व चमुद्धंतीति समुद्धतस्या
विनिघ्न उत्करं त्रिर्विचयतीतिमानेव खनतिद्यं गुल्फं चतुरंगुलं वीक्षताद्यमनात्रिर्हरतीति तैत्तिरीयसूत्रेपि अथप्रा
चीमेनवेदिमुद्धंतिस्त्र याग्नीध्रमाहाग्नीद्विद त्रिर्हरेति तत्त्रिराग्नीध्रोहरति यदाग्नीध्रस्त्रिर्हरस्तथसंप्रैषमाह
ब्रह्मन्ननुज्ञस्यमित्यादि वेदिकरणं यथोक्तं अत्रेमनुवर्तते यथोक्तं यथापूर्वं सूक्ते वेदिकरणं तत्र आग्निन्ने वसरे लेखासं
मर्शनानंतरं भवति किंच पूर्वमुक्तं अंगुलखाता खनतीति प्रधीनांमूलोच्छेदने पर्यंतं वा खनतीति तदस्मिन्नवसरे क
र्तव्यमित्यर्थः उत्तरं तत्संभवति परिग्रहं परिगृह्णातिसुक्ष्मास्येनोत्तरं खनतीति प्रति मंत्रं पूर्ववत् अत्रापिब्रह्मन्नुत्तरं
पतिरिग्रहं परिग्रहीष्यामीति ब्रह्मणामामंत्र्यउपरिगृह्णाणो ज्ञेयं तेनानुज्ञातोध्वर्युः पूर्ववद्दाहं परिगृह्णातिसुक्ष्मी
चासीत्यादिभिर्मंत्रैः प्रतिमंत्रंतमनुविधेयान्तरेणापरिग्रहेणापयेगहं सुक्ष्मा चासी मास्पृश्तेः उत्तरं परिग्रहं मित्यस्य

दयेत्यादिः आज्येनोदेद्दीप्तं संप्रैषमाह ब्रवीति यदि प्रैषं दातुं नेच्छेत्ततो न ब्रूयात् स्वयमेवाग्नीध्रः प्रैषेणोपि ब्रह्मन्
नाद्विवस्प्रोक्षणीरासादनादीनदार्थोनुप्रोक्त सवाज पर्युपर्येव प्रोक्षणीषु धापिमाशास्व यस्पेनमुपछतीति तथा अ
घेतीवाचंवरति प्रोक्षणीरासादयेध्मं बर्हिरुपसादयेत्यादिसु तथा संप्रैषएवैषयदि कामयेतन ब्रूयात् नघ्रुकाम
येतापि नाद्रियतस्वयमुत्थावैतद्दूरमतः कर्मकर्तव्यमितिश्रुतेः प्रैषपक्षे तदभावपक्षे वप्रोक्षणीपासादीनामग्नीध
एवकर्तव्यं तदिहरिस्वामिनः स्वयमेवाग्नीत्प्रश्नुति विहितं वेदेदूरमतः पदं कर्तव्यमिति अतोमयेपि नापि तु या
दिति अन्येचप्रैषप्यस्पेयदार्थानामुधष्युकर्तव्यंचमाहुः स्वयमेवाध्वर्युर्वेदेदमतः कर्मकर्तव्यमिति कात्यायना
यत् यत्रीशब्दस्याने कृयत्रीकेप्यरहः एकवचनांतस्यैवसमाम्नानात् न प्रक्षतावद्भूर्वत्वादितिन्यायात् अथ
शब्दोधायेमात्मास्वनप्रोक्षणीषु सर्वप्रैषाणां प्रापणार्थुः अन्यथा प्रैषसमनंतरमेवाध्ययाद्यो नुष्ठानस्यप्र
वेत्रन्यायप्रयुक्तोनः प्रोक्षणीरासादयेति प्रैषवचनानंतरमेव प्रोक्षणपासादनं प्राप्नोतीति तन्माभूत्सर्वप्रैषानंतरमासा
दनं यथा स्यादित्येवमर्थोयं शब्दः अत्रेध्माबर्हिः शब्दोवहूनामपि यथा मेषु विपरिणामेन आज्यशब्दश्च प्रोक्षणीशब्द
स्तु मोत्सते बहुवचनात वानां ततश्चैवं प्रोक्षणीरासादयेध्माबर्हिरुपसादयस्रुचः संमृड्ढि पत्नीं संनह्याज्या
न्यांसुदेहीति गृहमेधीयायांतु एकवाक्यस्तुचेसंमदोसूदः अत्रेदं संदिग्धेत किंयंगावप्रैषएव प्रैषार्थेऽतानः प्रै

३२

इ॰भा॰ येऽन्यः प्रैषार्थ इति किं तावत्प्राप्तं एक एव प्रैषः प्रैषार्थयोरिति कुतः समाख्यानात् अएवमेव ध्रुवायाः इति वाजिनीत्ये
तिष्ठचमिति क्तत्वात् ॥ ॥ तूष्णीं प्राशित्रहरणं ऋतावदाने पात्री च ॥ स्रुचां संमार्गानंतरं तूष्णीं प्राशित्रहरणं सं
मार्ष्टि ततः प्रतप्य प्रपद्यतीति । अविशेषात् द्वयोरपि संमार्गः । स्रुक्वचनं तु ज्ञासापेक्षं । ततः ऋतावदानं तूष्णीं संमृ
ज्य प्रतप्य प्रपद्यति । ततः पात्रीमिति अविशेषोपदेशात्तु रोशाशपोस्थानिमिआपाऽयो स्रुवक्षेणात् तूष्णीं संमार्गप्र
तपनसमर्पणीमिति । तूष्णीं प्रतपने चोदकस्पर्शनाभावः । स्रुवस्यैव तत्मंत्रोच्चारणाभावात् चकारानविधानात्
पशुमोहावदाना अस्याधिस्थानापत्त्या स्रुवधर्मेणाभः । ततस्रुक्स्रुवसंमार्गानंतरं अग्रेसः पूर्वं स्रुवमंत्रेणाग्रतप
नं अनिशितान्मासीति संमार्गः । पुनः प्रतप्याप्रतउपस्रुक्उपसमर्पणमिति । वसाहोमहवन्याः प्रचरणपाश्वं तु द्रव
तूष्णीं संमार्गप्रतपने अन्येषामपि जुहूस्थानापन्नानां शूर्पीकपणीदोहनौदुंबरस्रुवादीनां जुहूवत् संमा
र्गप्रतपनसमर्पणानि । पृषदाज्यायप्रभृतस्थापभृद्वत् । मेक्षणस्य ऋतावदानवत् । वाजिनभांडस्य पुरोडाश
पात्रीवदिति संप्रदायः । तत्तु विचारणीयं तदुपदेशातिदेशयोरभावात् । आपस्तंबादिसूत्रे स्रुवे दाग्रैर्वेदाग्रा
णामेव मूलैश्च पात्राणां संमार्ग उक्तः ते ॥ कर्काचार्यैरप्येवमेव व्याख्यातमस्ति । मूलैरिति वेदाग्रमूलैः । अन्ये एम०
तु वेदाग्रैर्वेदमूलैरिति आचक्षते तेषामयमाशयः । स्रुवादिष्वग्रैः ततः संमार्ष्टीति मूलैर्बाह्यतस्तत एकस्याग्रैः

३३

एकस्य मूलैरित्यपेक्ष्यते । तत्रापोहित्वशाब्दस्य पक्षे तु इति वाक्यशेषात् कुशाग्रैः कुशमूलैरित्येतावत्प्रतीयते । तथा तद्वेकस्य
वेत्संमार्जनान्यग्नावभ्यादधतिवेदस्याग्राभवन्निति वाक्यशेषात् वेदस्याग्राणि वेदस्य मूलानीति गम्यते । हरिस्वा
मिनस्रुक् अग्रैरिति वचनात् वेदाग्रग्रहणं मूलैरिति वचनात् मूलानां अन्यतरस्मिन् गृहीते उभयं न संभवतीत्यभयग्र
हणं । मूलं हि परिच्छिन्नाग्रं परिच्छिन्नमूलं चाग्रमिति । एके तु वेदाग्रैरिति समस्तानामेकत्वं वेदपदं निःकाश्य मूलै
रित्यनेन योजयितुं शक्यं । तेन सर्वाणि धानादेवदाग्रमूलैरिति कर्काचार्यैर्व्याख्यातं । आपस्तंबसूत्रे विशेषः पत्नीं संन
ह्य मेखलामानयतीति स्रुक्संमार्जनमेके इति तथा आहवनीये गार्हपत्ये वा प्रतितप्येति । विहत्याप्रविश्य विशुष्याप्रवि
श्य वा तैः स्रुवः संमार्ष्टि प्राचीमुदीचीं वोदितानाधारयन्मार्ष्टीति तथान संमृष्टान् संमृष्टैः संस्पर्शयतीति च । पुनः
प्रतितप्याश्याग्रेणोत्करं दर्भेषु सादयति । जघनेन चिति संमृष्टा यथास्थानमुत्तानाः स्रुचः सादयतीति मानवे ॥ ॥
संमार्जनान्यपास्यति ॥ सर्वसंमार्गानंतरं संमार्जनानि संमार्जनसाधनानि वेदाग्रमूलान्युत्करेऽपास्यति प्रक्षिपति
। तस्मादुपरास्येद्दैवतानीति वचनात् ॥ ॥ आहवनीये प्रासनमेके ॥ ॥ एके शाखिनः स्रुक्संमार्जनानां वेदाग्रमू
लानामाहवनीये प्रासनं प्रक्षेपं कुर्वंति । तद्द्वेके स्रुक्संमार्जनान्यग्नावभ्यादधतीति प्रकृत्य तदुत तथा न कुर्यादिति श्रु
तेः । अत्राहापस्तंबः । संमार्जनान्यद्भिः संस्पृश्याग्नौ प्रहरति यस्मिन्नातपत्युत्करे वेति ६ ॥ ॥ पत्नीं संनह्यति यत्प्रद

दे०मा०द्वि क्षिणत उपविष्टां गार्हपत्यस्य मुंजयोक्त्रेण त्रिवृता परिहृत्य । धिवासोदित्यैरास्नेति ॥ ततोग्नीत् गार्हपत्यस्य प्रत्यग्दक्षि
णतो नैर्ऋत्यां दिश्यैशानदिग्मुखीमुपविष्टां पत्नीं यजमानस्य भार्यां त्रिवृता त्रिगुणेन मौंजमयेन योक्त्रेण संन्न
ह्यति । बध्नाति । कथं संनह्यति । अदित्यै रास्नेति मंत्रेण । तथा चाक्रमधिवासः वाससो बहिः परिहरति । परितो वेष्टय
ति । अथ पत्नीं संनह्यतीति प्रकृत्य योक्त्रेण संनह्यतीति सवासा अभि वासः संनह्यतीति संनह्यत्यादि स्मारृति । तथा
सा वै पश्चात्प्राची यज्ञमन्वासीत तस्मादुदक्षिणत इवैवान्वासीतेति च श्रुतेः । आपस्तंबः । अपरेण गार्हपत्यम
धिजुमासीनां पत्नीं संनह्यतीति तिष्ठंतीं वेति । अनेकाश्चेत्सर्वासां संनहनं तच्चैतत्संनहनं नाभेरकटिप्रदेशेक
र्तव्यं । कुतः । अस्ति वै पत्न्या अमेध्यं यदवाचीनं नाभेरथैतदाज्यमवेक्षिष्यमाणा भवति तदेवास्या एतद्योक्त्र
णांतर्धाय अथ मेध्येनैवोत्तरार्धेनाज्यमवेक्षत इति वाक्यशेषात् ॥ ॥ दक्षिणां पाशमुत्तरे प्रतिमुच्योर्ध्वमुद्गूहति
विष्णोर्वेष्य इति ॥ परितो वेष्टिदेतानंतरमग्नीदेवतस्य योक्त्रस्य दक्षिणां पाशमुत्तरे पाशे शंकुस्थानीये प्रतिमुच्य
प्रोतयित्वानत्रः सामर्थ्याद्द्विगुणं वेष्टयित्वा तद्दक्षिणां योक्त्रपाशमूर्ध्वमुद्गूहति । वेष्टिते योक्त्रे एव प्रेरयति विष्णो
र्वेष्य इति मंत्रेण । ऊर्ध्वमेवोद्गूहति विष्णोर्वेष्यासीति श्रुतेः । संलग्नं त्रिगुणीकृतमुभयी रज्जुमभितः प्रवरग्रंथित्र एम०
यपुक्तमंतयोः पाशग्रंथिद्वययुक्तं योक्त्रं तेन बध्नातीति हरिस्वामिनः । तथा संनह्यतीति वचनात्संनततो नहने वासस

मुपरिवेष्टयित्वोर्ध्वं योक्त्रमध्ये गूहति । ऊर्ध्वं योक्त्रमध्ये गूहनसामर्थ्यात् द्विर्वेष्टनं । एकवेष्टने तद्गूहनस्याशक्यत्वात् ॥
॥ न ग्रंथिं करोति ॥ योक्त्रबंधनं कुर्वन्नग्नीत् ग्रंथिं न करोति । स वै न ग्रंथिं कुर्यादिति श्रुतेः ॥ ॥ ऊर्जे त्वेत्याज्यमुद्वास्य
पत्नीमवेक्षयत्यदब्धेनेति ॥ वेदस्थेन गृहीता ऊर्जे त्वेतिमनेन मंत्रेणाग्नीदाज्यमुद्वास्य पुरोडाशाभ्यां पूर्वं तदाज्यानी
योत्तरतो भूमौ निधापयत् तत्तदाज्यं पत्नीमवेक्षयति णिजंतापदेशात् आज्यमवेक्षस्वेति संप्रेषणा । सा चैव
दृंहस्व गृहीतास्यदब्धेनेति मंत्रेणाज्यमवेक्षते । अथाज्यमवेक्षते इति प्रकृत्य स सावेक्षते दब्धेन त्वेति श्रुतेः । आ
पस्तंबः । ऊर्जे त्वेत्याज्यं वेदेनोपयम्य पत्न्या उपाहरति तत्सा निमील्य वीक्ष्यानुद्धरंती वीक्षत इति । मान
वेव । वेदोपयामाददब्धेति पत्न्याज्यमवेक्षतेरति । न च्चैतदाज्यावेक्षणं परार्थत्वात् दर्शनेकपत्नीत्वे एकैव करोती
ति गम्यते । पितृपत्नेचाक्षुपुरेवावेक्षते । आज्यसंस्कारस्याप्रतिपिहितत्वात् । एवं रजस्वलायां प्रसूतायां प्रोषि
तायां वा ज्ञेयं । सावेक्षते दब्धेनेति वचनादवेक्षण एव मंत्रो न प्रेक्षणे ॥ ॥ विधां करोत्यपं प्रोक्षणीभ्यः ॥
पत्न्यवेक्षणानंतरमग्नीत् तदाज्यं नीत्वा प्रोक्षणीभ्योपरं आसादितानां प्रोक्षणीनां पश्चाद्विधां करोति
उपविश्य आसादयतीत्यर्थः । अथाज्यमादाय प्राङुदाद्रवति तदंतर्वेद्यासादयतीति श्रुतेः ॥ ॥ आहवनी
यवाकृत्वा तच्छ्रापिणः । तच्छ्रापिरास्त्याहवनीयश्रापिणो यजमानस्यधस्यवेक्षणानंतरमाज्यमाहवनीयेऽधि

ह॰भा॰

त्वा आहवनीयेऽधिश्रित्य पुनरुद्वास्य प्रोक्षणीभ्योऽपरं वेद्यां करोति। वाशब्दोऽव्यवस्थायां। आहवनीयश्रपणमेवं क
र्तव्यं। गार्हपत्यश्रपणस्तु प्रागुक्तमेव। कुतः। एषा व्यवस्थेति चेन्न। आहवनीये श्रपणे नित्यमेव श्रूयते। अथाज्य
मादाय प्राङुद्द्रवति तं दाहवनीयेऽधिश्रयति यस्याहवनीये हवीꣳषि श्रपयन्ति सर्वो मेऽयन्न आहवनीये श्रृतोऽस
च्चिति। तथा तत आदत्ते तदं तद्वेद्यां सादयतीति च॥ ॥सवितुस्त्वेत्याज्यमुत्पुनाति॥ वेदमुपयम्य सवितुस्त्वे
त्यनेन मंत्रेण। ध्रुवपूर्वे धामसादितमाज्यं पवित्राभ्यामुत्पुनाति। प्रोक्षणीषु पवित्रे भवतस्ते न तत्रादत्ताभ्या
मुत्पुनातीति श्रुतेः॥ ॥प्रोक्षणीश्च पूर्ववत्॥ प्रोक्षणीश्च पूर्ववदुत्पुनाति। पूर्ववदिति पवित्राभ्यां सवितुर्व इति
मंत्रेणास्फ्येयाप्यग्रहेण वकारस्तु नास्ति तस्यानुकर्षणार्थः। कर्को चाप्याह। चकाराशङ्कं च पूर्ववदेव न त्वन्यथा आज्यो
त्पवनेन पवित्रे प्राप्ये ते इति आख्यातवंतः॥ प्रोक्षणीनां पुनरुत्पवनमिच्छन्ति बर्हिषोः प्रोक्षणार्थे अतश्चैतद्भावेन
भवति॥ ॥आज्यमवेक्षते तेजोऽसीति॥ अध्वर्युराज्यमवेक्षते विलोकयति। तेजोऽसीत्यनेन मंत्रेण। अथाज्यमवेक्ष
त इति श्रुतेः॥ ॥यजमानो वा॥ यजमानो वा आज्यमवेक्षते तेजोऽसीत्यनेन मंत्रेण तद्धैके यजमानमवेक्षाप एम॰
यन्तीति तस्मादध्वर्युरेवावेक्षेत तत्र भयपथाश्रुतत्वाद्विकल्पः॥ ॥स्रुवेणाज्यग्रहणं॥ तत्र यदाज्यग्रहणं तत्स्रुवेणै
व कर्तव्यं सामर्थ्यात्॥ ॥चतुर्जुह्वां धाम नामेति सकृन्मंत्रः॥ जुह्वां चतुराज्यग्रहणं भवे। चतुरः स्रुवान् गृह्णाति सकृन्मंत्रो या

दित्यर्थः। तत्र धाम नामेत्ययं मंत्रः सकृत्प्रयोज्यः प्रथमस्रुवग्रहणे एव। स एतेन यजुषा सकृज्जुह्वां गृह्णाति त्रिस्तूष्णी मि
ति श्रुतत्वात्। न ग्रहणावृत्त्यादिनाज्यग्रहणे प्रतिग्रहणं मंत्रः प्राप्नोति तत्रानेन वचनेनोत्तरेषु ग्रहणेषु मंत्रो
निवार्यते। ननु चैतदपि प्रागुक्तमेव वचनादाज्यमिति। सत्यं। अत्र सकृन्मंत्र इति पुनरारंभो वाक्यस्य ज्ञापनार्थः।
स एतेन यजुषा सकृज्जुह्वां गृह्णातीत्येकं वाक्यं तदाक्षिप्तं त्रिरेव यजुषा गृह्णीयादित्यपरं। तेनाज्यग्रहणे त्रिर्मंत्र
वचनं सकृन्मंत्रवचनं चेति विकल्पः सिध्यतीति अत्र सकृन्मंत्रवचनमत्र विधीयते। त्रिर्मंत्रवचनं तु परिशेषात्परि
भाषायां सिद्धमिति। तैत्तिरिस्त्रे। प्रोक्षणीषु पवित्रे अवधायादत्ते दक्षिणेन स्रुवं स्थापयन् जुहूं वेदं प्रतिष्ठाप्य त
स्यां गृह्णी ~~धिमिमि नैत्तिमिस्येना~~ त इति॥ ॥अष्टावुपभृत्यल्पीयो नुयाजाश्चेत्। येषां स्विन्नुयाजा भवन्ति ते तदानु
पभृत्यष्टौ स्रुवाणि गृह्णीयात् तस्योपभृत्याज्यमल्पीयः जौहवादाज्यादिति श्रयेना संख्यातं। स यच्चतुर्जुह्वां गृह्णात्यष्टौ उप
आज्यं गृह्णात्यष्टौ कृत्व उपभृति गृह्णन् कनीय आज्यं गृह्णातीति श्रुतेः॥ स एतेन यजुषा सकृदुपभृति गृह्णाति सप्त
कृत्वस्तूष्णीमिति श्रुतेः। अत्रापि सकृदेव मंत्रः। इहानुयाजानां नित्यत्वाच्चेच्छन्द्वो विकृतिविषयः॥ ॥चतुरन्यत्र प्र
तिविभागात्॥ अन्यत्रानुयाजवत्कर्मणो अन्यस्मिन्कर्मणि। अनुयाजाभावे इति अन्यदृव्यानुयाजकेषूपभृति
चतुरेव चतुर्गृहीतमेव ग्राह्यं कुतः प्रतिविभागात्। औपभृतस्याज्यस्य प्रयाजेष्वनुयाजेषु चोपयोगः प्रतिविभागेनोपयो

३६

दी.भा

गोद्दश्यंतेऽर्धं प्रयाजेषु प्रयुज्यंतेऽर्धमनुयाजेष्विति। अतश्चौपभृतस्योभयार्थत्वगम्यते तेन यत्रानुयाजाभावः
तत्र प्रयाजार्थमेव चतुर्गृहीतं भवतीत्यभिप्रायः। किंच ॥ ॥पश्वातिथ्ययोर्दर्शनाच्च॥ पशावातिथ्यायां चोपभृ
ति चतुर्गृहीतस्य दर्शनाच्चैवं गम्यते। यदनुयाजाभावेन प्रद्व्यर्थकेष्वनुयाजेषु चोपभृति चतुर्गृहीतमेव गृह्णीयादि
ति। पशौ तावदन्यद्व्यर्थकेष्वनुयाजेषु सत्स्वनूपभृति चतुर्गृहीतं भ तिर्दर्शयति। अयोत्स्याघ्रौसं चतुर्गृहीतं जु
ह्वां चोपभृति च गृह्णाति पंचगृहीतं पृषदाज्यमिति। तथातिथ्यायामनुयाजाभावे सर्वाण्येव चतुर्गृहीता
न्याज्यानि गृह्णातीति न ह्यत्रानुयाजा भवंतीति। अत्रानुयाजार्थेन चतुर्गृहीतेन प्रयोजनाभावात्प्रयोजनार्थमे
व प्राप्तं चतुर्गृहीतं दर्शयति ॥ ॥नकृत्स्नोपदेशात्॥ नैतदेवं यदुक्तमुभयार्थमेतदिति। कुतः कृत्स्नोपदेशात्कृत्स्न
स्य समयस्यापि पृथग्गृहीतस्यानुयाजार्थत्वेन कृत्स्नानुपदेशात्। अथ यदष्टौ ह्युपभृति गृह्णातीति कृत्स्नस्या
नुयाजेभ्यो हि तद्गृह्णातीति। ननूक्तं प्रतिविभागादिति अर्धस्य प्रयाजेषूपयोगार्थस्यानुयाजेष्विति। सत्यं।
अनुयाजार्थस्यैव सतो वचनात्प्रयाजेषूपयोगः। यथा प्रयाजार्थस्यैव जौहवस्य वचनाद्ध्रुवाघारे। ननु हि
पश्वातिथ्ययोर्दर्शनादिति तत्राह॥ ॥पश्वातिथ्ययोर्वचनात्॥ यदा वा कृत्स्नस्यौपभृतस्यानुयाजार्थ
त्वं तदा पशावातिथ्यायां चाष्टगृहीतमेवोपभृति प्राप्नोतीत्यतो वचनात्तत्र चतुर्गृहीतं विधीयते। अतो विधानमे

राम

३६

तत्र दर्शितं तद्धि प्राप्तिपूर्वकं भवति प्राप्तिश्च नास्तीत्यत एवास्मिन्सिद्धान्ते वरुणप्रघासेषु महाहविषि च अनुयाजा
र्थं पृथगुपभृति न गृह्यते। पृषदाज्येवाग्नीपशावनुयाजाः क्रियंत इति विशेषः। अत्र ब्रूमः स्यादेतदेवं यदि
कृत्स्नोपदेशो भवति सकलमप्यौपभृतं यदि केनचिद्वाक्येनानुयाजार्थमुद्दिश्येत न तूपदिश्यते यतः शाखान्तरेण
तदुभयार्थं श्रूयते यदष्टौ ह्युपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद्गृह्णातीति। ननु प्रयाजार्थतापि सकलस्य श्रू
यत एव। अनुयाजेभ्यो हि तं न गृह्णातीति। सत्यं। शाखान्तरे उभयार्थत्वविधानादेकदेशानुवादः स्यादिति
। ननु विपरीतं कुतो न भवति। अनुयाजार्थत्वबोधकं विधायकमुभयार्थबोधकमनुवादकमिति। नैवं। अनुयाजे
भ्यो हि तं गृह्णातीत्यत्र न सकलस्यानुयाजार्थत्वे विहिते प्रयाजार्थत्वस्याभावात्प्रयाजानुयाजेभ्यो हीत्यनेनोभ
यार्थतानुवादितुमशक्या। उभयार्थत्वबोधकवाक्येन विधाने कृते इति एकायथाप्रानुयाजांशोऽनूद्यत इत्यदो
षः। अतः कृत्स्नस्यानुयाजार्थत्वेनोपदेशाभावात्। उभयार्थमेवौपभृतमिति सिद्धं। पश्वातिथ्ययोरपि वचनं ने
तदेवं स्याद्यद्यौपभृतस्य वा स्यादुभयार्थता न स्यात् तस्य चोभयार्थता पूर्वमेव साधिता। अत आतिथ्यायां पशौ
चोपभृति चतुर्गृहीतमेव प्राप्नोतीति। अतः प्राप्तिपूर्वकत्वाद्दर्शनमेवैतन्न विधानमिति। तेन वरुणप्रघासेषु महाहवि
षि चान्यद्व्यर्थकेष्वनुयाजेषु प्रयाजार्थमुपभृति चतुर्गृहीतमात्रं ग्राह्यमिति चिन्तायाः प्रयोजनं॥ ॥ध्रुवायां च जुहूवत्

ध्रुवायां च जुहूवदाज्यं गृह्णीयात् जुहूवदिति चतुर्गृहीतं सकृन्मंत्रवचनमिति। तेनैव यजुषाष्टकृ ध्रुवायां गृह्णातीति त्रिस्तूष्णी
मिति श्रुतत्वात्। चकारादुपभृत्यपि जुहूवदेव गृह्णीयात्। तेनोपभृत्यपि सकृन्मंत्रवचनमुक्तं भवति त्रिर्मंत्रवचनपक्षे
च जुह्वां ध्रुवायां च चतुर्थेन तूष्णीमुपभृति वा आपस्तंबः। भूयो जुह्वामल्पीय उपभृत्यल्पिष्ठं ध्रुवायामिति॥ ॥इ
ध्मं तोहेति विस्रंसः स्रुवेरिं च बर्हिः प्रतिमत्स्यवेधाकृत्वा पुरस्तात्कुंभीपिकृत्वासादीति पतिमंत्रं॥ इध्मं वेदिं बर्हिश्च कृ
त्वासीत्यादिभिः प्रतिमंत्रं क्रमेणाभिप्रोक्षति कथं प्रोक्षतीति तत्रेध्मं विस्रस्य तत्रस्थमेव कृत्स्नमासादीत्यनेन प्रोक्षति। प्रोक्ष
णीरघपुराहतेमहइध्ममेवाग्रे प्रोक्षति कृत्स्नमासीति श्रुतेः। अग्रे प्रथममित्यर्थः। ततो वेदिरसीति वेदिं प्रोक्षति।
अथ वेदिं प्रोक्षति वेदिरसीति श्रुतेः। ततो बर्हिः प्रतिगृह्याग्नीध्रादर्पितं हस्तेनादाय पुरस्ताद्ग्रंथि यथा वेद्यां
कृत्वाग्रगथमासीद बर्हिरसीति मंत्रेणाभिप्रोक्षति। अत्र प्रतिगृह्येति प्रतिग्रहणं कोगृह्णातिरन्यसमर्पितस्यादान
वतैव। तथाच श्रुतिः। अथास्मै बर्हिः प्रयच्छतीति तत्पुरस्ताद्ग्रंथ्यासादयति तेनाभिप्रोक्षति बर्हिरसीति। तत्रेध्मप्रो
क्षणे ब्रह्मन्निध्मं प्रोक्षिष्यामीत्यामंत्रणं। ॐ प्रोक्षेत्यनुज्ञातस्य प्रोक्षणं। बर्हिः प्रोक्षणे ब्रह्मन्बर्हिः प्रोक्षिष्या
मीत्यामंत्रणं। इतरदिध्मवत्। वेदिप्रोक्षणे त्वामंत्रणानुज्ञे न भवतः। अविहितत्वात्। वरुणप्रघासेषु ब्रह्मन्निध्मं प्रो एमं°
क्षिष्यावः। ब्रह्मन्बर्हिः प्रोक्षिष्याव इत्यूहः। इध्मस्याग्निसमिंधनार्थत्वेन प्रोक्षणं। अग्नये त्वा जुष्टं प्रोक्षामीति मंत्रलिं

गात्। तत्रेध्ममेवैतदग्नये करोतीति वाक्यशेषाच्च। अतश्च शतरुद्रियपरिध्यपस्पर्शनार्थस्येध्मकाष्ठस्य न प्रोक्षणं
। अग्न्यर्थत्वाभावात्। वेदेरपि स्तरणार्थमेव प्रोक्षणं। बर्हिषे त्वेति मंत्रलिंगात्। तत्रेध्ममेवैतद्बर्हिषे करोतीति वा
क्यशेषाच्च। अतश्च पयस्यायां स्तरणाभावे वेदिप्रोक्षणाभावः। उपभृत्त्वग्नीषोमीये च्छत्तता पात्। स्रुक्सि
सेकत्वपोहकः। तत्र आरूढमेधीपि पयस्यायां चान्वंबध्यास्यानीयायां प्रस्तरमात्रे बर्हिषि स्रुक्चेत्वेति प्रयोगः
। ज्योतिष्टोमे शकटबर्हिषि पयस्यापक्षे स्रुग्ध्यांतेत्वेति प्रयोगः। पयस्यायां तस्मिन्बर्हिषि उपभृत्प्रस्तरयोरासा
दनात्॥ येषां मते पयस्यायां प्रस्तराभावः तेषां शकटबर्हिषः स्रुक्चेत्वेति प्रोक्षणं। अन्वंबंध्यापक्षे तु बर्हिरसि त्वाजु
ष्टमित्येवं स्रुक्छब्दप्रयोगे वर्जिते एव मंत्रः। कुतः। शकटबर्हिषि स्रुगासादनाभावात्। तत्कुतः। अग्नी
षोमीयपशावग्नीषोमानूबंध्यासु पुनरेकवत्तत्वात्स्रुगाविधानात्। तेन त्रिरसन्ने। आहरं स्येतद्बर्हिः तदरणामणीता
स्वाहवनीयं वतद्दते वेदिपुरस्ताद्ग्रंथ्यासाद्य प्रोक्षतीति। अतएव प्रणीताख्यशेषोनकार्यं स्रुके॥ ॥शे
षं मूले उपसिंचत्यदित्यै व्युंदनमसीति॥ बर्हिषः प्रोक्षणानंतरं प्रोक्षणीशेषं बर्हिर्मूले उपसिंचति निनयति अ
दित्यै व्युंदनमसीति मंत्रेण। तथा च श्रुतिः। अथ याः प्रोक्षण्यः परिशिष्यंते ता अभिरोषधीनां मूलान्युपनिन
यत्यदित्यै व्युंदनमसीति। अत्रमूलानीति द्वितीया यया मूलानां संस्कार्यत्वं गम्यते। ताभिरिति तृतीया चापां तत्र करण

त्वंमन्त्रेतु विपरीतं तत्र मन्त्रस्य श्रुतिमूलत्वात्तुस्यानुरोधेन व्यत्यासो ध्येयः । न तु स्थानेयं शेषस्य प्रतिपत्तिः ॥ अतश्च नाशस्रो
षोशे पुनः प्रोक्षणीरु सादयम्मूलोपेतं च न कर्तव्यं । शेषशब्दप्रयोगस्तु समस्तानां निषेधार्थः ॥ ॥ पवित्रे निधाय
प्रणीतासु बर्हिर्विस्रंस्य पुरस्तात्प्रस्तरस्य ग्रहणं विज्ञेयमिति । मूलोपेतं च नानंतरमध्वर्युर्हस्तेन प्रणीतासु प
वित्रे निधाय ततो बर्हिर्विस्रंस्य मुतस्य बर्हिषः पुरस्तात्पूर्वभागाद्विष्णोस्तूपोसीति मंत्रेण प्रस्तरग्रहणं निः
काशनं कुर्यादिति सूत्रार्थः । तत्कालप्रस्तरस्य पृथक्करणेफं ग्रः । अथ यद्विस्रंसं प्राग्ग्रंथिं पुरस्तात्प्रस्तरं गृह्णाति वि
ष्णोस्तूपोसीति श्रुतेः । ते नवपयस्यायां गृह्णमेधीयेपि प्रायांचना यमंत्रः । पृथक्करणाभावात् । पृथक्कृतएव
तत्राहावितिपित्रापांचद्गृहस्तात् गृहीतोपि प्रस्तरमात्रेशिष्टेः स्तके ॥ ॥ बर्हिर्लोमश्राय संनहनं विस्रंस्यदक्षि
णास्पांवेदिश्रोणौ निधायान्येनबधायवेदिं स्तृणात्संर्ण मद्रहमिति निश्चिप्त ॥ तं गृहीतं प्रस्तरं चाहवनीयं पूर्व
र्वेणात् दर्भो ब्रह्मणो प्रदाय समर्प्य बर्हिषः संनहनं बंधनरज्जुं विस्रंस्य विमुच्य रज्जुरूपत्वं परिधाय तु दक्षिणास्या
वेदिश्रोणौ प्रागग्रमुदगग्रं वा यथासंभवं निधाय प्रस्तृतं तद्बर्हिषान्यैवेदिं स्तृणोति प्रस्तृतं तं संनहनमवधाय प्र
च्छाद्य ऊर्णाम्रदसमिति मंत्रेण त्रिधात्रिधानुवेदिं बर्हिषा वेदिं स्तृणाति । आच्छादयति । अथ संनहनं विस्रंस्यपति
। तद्दक्षिणायावश्रोणौ निदधाति । तत्पुनरभिच्छादयति । अथ बर्हिः स्तृणाति त्रिवृत्स्तृणातीति च श्रुतत्वा

ऽम॰

त् । पितृयज्ञे च स्वाहस्यां देवपितृभ्यस्तुहः । मनुः । अग्रेणाहवनीयं पर्याहृत्य प्रस्तरं ब्रह्मणो प्रयच्छतीति । तथा मुखतः
प्रस्तरं गृह्णातीति नो स्रज्यान्त्रा वमृज्यान्न विधूनुयादिति । ब्रह्मा प्रस्तरं धारयति यजमानो वेति वा पर्वतवः ॥ ॥
उपयत्या वा ॥ वाशब्दो विकल्पार्थः । न त्रिवृद्विस्यपं नियमः । उपयत्या दृढं स्तृणाति । यावतीभिरा बर्हिर्भिर्वेदिस्त
णामाच्छादनमुपपद्यते संपद्यते तावद्भास्तरणीयं पंचाहत्तु । एवमावृत्तिविनिनहिस्त्रिपरिमितादिपक्षे पंचसो
मादौ च त्रिवृत्स्तरणं न सकलवेदेः छादनमुपपद्यते । तेनेदमुच्यते उपपत्या अयुग्मा आवृत्तो भवंतीति । अ
त एव शाखांतरे श्रूयते । अयुग्धातु । बर्हिःस्तृणातीति त्रिधातु पंचधातु वा वेदिं स्तृणातीति च ॥ ॥ बहुलं ॥ बहुलं
निबिडं घनं निरंतरं बर्हिः स्तृणाति यथा भूमिर्न दृश्यते । बहुलेनं स्तृणीयादिति श्रुतेः ॥ ॥ अधरमूलं ॥
अधरमूलं स्तृणाति । अधराणि अधस्तात् मूलानि यस्य तदधरमूलं । पूर्वं स्तृतस्य बर्हिषो मूलानि पश्चात्स्तृ
यमाणबर्हिषोग्रैः प्रच्छादनीयानीत्यर्थः । अत एव शाखांतरेप्युक्तं । मूलान्यग्रैः प्रच्छादयतीति ॥ ॥ पश्चाद
पवर्गं ॥ पश्चादपवर्गः समाप्तिर्यस्य तत्पश्चादपवर्गं वेदेः पूर्वभागादारभ्य पश्चिमभागे समाप्तिर्यथा भव
ति तथा स्तृणातीत्यर्थः । तत्रैकं मुष्टिं वेदेः पूर्वभागादारभ्य पश्चिमभागे समाप्तिर्यथा भवति तथा स्तृणातीत्य
र्थः । तत्रैकं मुष्टिं वेदेः पूर्वभागे स्तीर्त्वा द्वितीयं मुष्टिं वेदेर्मध्यभागे पूर्वस्तृतबर्हिषो मूलान्यग्रैः छादयन्स्तृणा

द॰भा॰

ति। तमस्तृतीयं मुष्टिं वेदेः पश्चिमप्रांते पूर्ववद्द्वितीयमुष्टिहरणो न संसृष्टं पूर्ववत्तृणानि यदि स्युस्तदा तस्यापि प्रत्यवहरणमा
मिति सिद्धः पक्षः पक्षांतरमाह ॥ ॥ प्रहृत्य हन्त्वा ॥ वाग्यच्छेदिति कल्पार्थः । हृत्वानुधमे । अथवा पूर्वे पूर्वेक्त तत्र हि यो ऽन्या
विप्रहृत्य हन्त्वा धेमुत्पाद्य न । तेषामन्यतमस्यासमत्वात् द्वितीयं मुष्टिं हरणानि । तस्याप्यन्यानिप्रहृत्य हन्तृतीयं मु
ष्टिं हरणाभ्यन्तः क्रमधर्ममूलमिति सिद्धं ततः प्रवर्हामिति द्रष्टव्य घमे । प्रहृत्य प्रहृत्योत्पाद्याथोत्पाद्येत्यर्थः । वेदेः पश्चिमप्रा
इवे स्त्रीतोत्तस्याग्राणि यज्ञाद्विनोत्पाद्येभ्यो मधस्तात् स्पर्धनाद्वियो यथा मूलानि भवंति तथात्मनापात्त
स्या पश्यानुत्पाद्या नेस्यान्स्थान्यधःकुर्याद्वितीयेन प्रवर्हेमित्यस्यार्थः । आनुपूर्वीत्यानुपूर्वेस्य नाम । एवं चेत
क्रियानुपपत्तीर्णा भवतीजरथ्यातधर्मसूत्रस्य संपादनापद्मागाग्रं भ्रमस्य गणवर्गस्तीर्णमार्गमनुपूर्वेस्तीर्णे येते ।
नानुपूर्वेस्य पश्चादनुपूर्वेमिति । सततं प्रस्य गणवर्गेनुपूर्वता भवति । सत्यमेवं । किंतु पूर्वेस्तीर्णस्य यज्ञे रेखा
न्याकारस्तद्वनानुपूर्वमित्यभिप्रायः । इति हरिस्वामिनः । आनुपूर्वं गनुपक्रांपर स्यासंवद्धं बर्हिरिध्मं प्रवस्तृ
णांनीति छ यकपदस्यार्थैः । अतोस्मान्मंत्रलिंगात्स्तर्वं मुष्टिमपतिगत्स्यात्स्यावस्तान्त्वासकृमेवो परं मुष्टिंस्त
णीति पाशिलिभावरतिमाधवाचार्याः ॥ आपस्तंबः । वेदिं स्तृणाति बहुलमनतिदूरं सभाग यवं गस्थि गत परम राम॰
परं युग्धातु बहुलमनाशोकमिति । लोगाक्षिरपि कर्णप्रदस्यामिति दक्षिणावेधं संस्तृणाति मृदूसौ मुत्तरम

परं युग्धातु बहुलमनाशोकमिति । लोगाक्षिरपि कर्णप्रदस्यामिति दक्षिणावेधं संस्तृणाति मृदूसौ मुत्तरमग्रेमि
लानि छादयन्ननुयुग्ममिति । अथ परिस्तरणं प्रागग्रैः कुशैः परिस्तरणानि त्रीणि च दक्षिणापुरस्तात्प्रथममथ
पश्चादथ पश्चान्मूलान्यर्थैः प्रकृत्यादपनीति ॥ ॥ अग्नेरादाहननमाहवनीयाप्यविश्रमः ॥ आहवनीये पश्चापि शिरो
यजमानस्यात्रास्मिन्काले हविषामुद्वासनं कर्तव्यं कुतः । विरोधात् । पत्नीशालीमुद्वासनं न क्रियेतेत दाह
वनीयपक्रमणेन कृतस्मृतिहवींषि दत्त्वेवरनश्चात एव कपालोद्वासनमपि दक्षिणीमेव कार्यं ॥ ॥ इध्मात्समि
धमादायाहवनीयं कल्पयत्यपसुपरिभस्तं धारयन् ॥ इध्मादेकां समिधमादाय तदनंतरं ब्रह्मणः एका
शांतभस्तं चाधीहदापाहवनीयस्यापपरिषात्समोपस्तवमुस्तरं धारयन्नाहृदीत यावत्समिधा ब्रह्मणः भूत
पाहवनीयं कल्पयति । क एषामव्योहमिदाघातेन कृत्स्नमिंधनेध्मादेर्ज्वालनसमर्थं किरोतीत्यर्थः । को
ऽपि नाघारदंनाखर्वमाग्निमाहमपश्चात्समिधुक्षरांश्चिपेत् एवमत्रापि करोति । अथाग्निं कल्पयति
उपर्युपरि भस्तं धारयन्नकल्पयतीति शेषः ॥ ॥ उल्मुकं गृहस्थनुयाजे श्रेत ॥ चैव धनुयाजाः प्रकृतेक
मेणि भवंतितदा आहवनीयाद्देतुलमुकउद्धरति अपसार्य स्थानस्थापयति । ऊहंनवप्यहनवट्टमिमलगन

योरेवपुरस्ताद्धरणंनोत्तरपाघकहने। प्रेरणार्थेसैवसर्वत्रदृष्टत्वात्। इहतुअनुयाजानिसंभवंसेवावेद्धहृत्वातिथ्योपसदकहमे
धीमपप्पयस्यादिविकृतिविषयः। यत्रानुयाजानामभावस्तत्रोल्मुकोद्दहनंनभवति। अतोऽनुयाजार्थमेवैतदुल्मुको
द्दहनं। यतस्तयोःसमासेनाहवनीयस्यायातयामता। किमर्थं अनुयाजार्थं। ते वा एते उल्मुकेनुद्दहंत्यनुयाजेभ्य इति
तेपुनरनुसंस्पर्शयंतीत्यादिश्रवणात्। अतो अनुयाजार्थाहवनीयसंस्कारार्थमोल्मुकयोः। ततश्चोल्मुकोद्दहना
नंतरं आहवनीयानुगमनेनाल्मुकान्तस्त्यानयनं। किंतुगार्हपत्यादेवान्वाहारितिपुनराहरणं। तयोःपुनरनुसम्
सर्विसर्जनोवा तस्मादनुयाजानंतरं आहवनीयेसमासेनकार्यः। अनुयाजानांनिष्टत्वादिति आध्वर्यवप्रायश्चि
त्तहोतव्यमिति। ७॥ ॥परिधीन्परिदधात्याहुर्नैकवृक्षीयान्बाहुमात्रान्पालाशवैकंकतकार्ष्मर्यबैल्वान्य
र्वैलामेषुवल्मिमत्तरानवादिरौदुंबरान्वामध्यमद। शिरोत्तराणांधवैद्दूतिप्रतिमंत्रं॥ गंधर्वस्त्वा विश्वावसु
रित्यादि। भिर्मंत्रैर्मध्यमदक्षिणोत्तराणांपरिधीन्परिदधातिप्रतिमंत्रंक्रमेण। कीदृशान्परिधीन्। आर्द्रा
नशुष्कान्। पुनःकीदृशान्। एकवृक्षीयान्। वक्ष्यमाणानांपालाशवैकंकतादिपरिधिवृक्षाणांमध्येएकजातीय रामः
वृक्षसंबंधिनः एकवृक्षीयाः। तान्नेकवृक्षीयान्। त्रीनपिपालाशानथवात्रीनपिवैकंकतानीति। किमर्थमि

दं वक्ष्यति पूर्वालाभेपूर्वालाभउत्तरानिति। तेनएकस्यपरिधेर्द्वयोर्वापालाशयोरभावेजातिभेदोमाभूदित्येवमर्थमे
कवृक्षीयानिति। त्रयोपियज्जातीयाः संभवंतितज्जातीयानेवग्रहणात्। ननुमुख्यद्रव्यालाभेनैकोद्वौवापाला
शौ एकौद्वौवावैकंकतौइति किंजातीयान्परिधीनित्यपेक्षायामाह। पालाशवैकंकतकार्ष्मर्यबैल्वान्। पाला
शान्पालाशवृक्षावयवान्। ततोवैकंकतान्। विकंकतवृक्षावयवान्। ततःकार्ष्मर्यान्श्रीपर्णीवृक्षावयवान्।
ततोबैल्वान्बिल्ववृक्षावयवान्। किंप्रमाणान्। बाहुमात्रान्। यजमानबाहुप्रमाणानित्यर्थः। प्रमाणेमात्र
च्प्रत्ययः। बाहुःप्रसारितांगुलिहस्तआस्कंधात्। तथाहूर्वालाभेपूर्वालाभेपूर्वपूर्वैकवृक्षजातीयानामलाभेऽन्य
प्राप्तोत्तरोत्तरान्परिदधाति। तद्यथा। प्रथमंपालाशान्परिदधातिपालाशालाभेवैकंकतान्तेषामलाभेकार्ष्मर्या
न्तेषामलाभेबैल्वानिति खादिरौदुंबरान्वा। अथवाकार्ष्मर्याभावेखादिरान्खादिरवृक्षावयवान्औदुंबरानु
दुंबरवृक्षावयवान्वापरिधीन्परिदधाति। कुतः। यदिकार्ष्मर्यमयान्नविंदेदितिकार्ष्मर्यालाभंश्रुत्वातत्रपात्रमपि
बैल्वखादिरौदुंबराणांतुल्यविकल्पत्वमाम्नातत्वात्। ननुपालाशैः सहाविकल्पःकस्मान्नभवतीत्यत्राह। तत्संबंधा
दभावविधानाविरोधाच्च। पालाशाभावेवैकंकतानामुपादानंकुर्यात्। सर्वोपिमुख्यतैवखादिरौदुंबरानुपाद
दीतएवंपालाशाभावेवैकंकतैःसहखादिरौदुंबराणांविकल्पोपिएतदेवदूषणद्वयं। अतोबैल्वैःसहैवविकल्पः। तदु

दे॰भा॰

क्षं। अभावे हि पालाशस्य वैकंकतविधिपितेन। तेन बिल्वादिकस्यापि हैरवादिरौडुंबराविति। नैव पालाशाः स्युरिति प्रकृतस्य
हि पालाशान्न विंदेरथो अपि वैकंकताः स्युर्यदि वैकंकतान्न विंदेरथो अपि कार्ष्मर्यमयाः स्युर्यदि कार्ष्मर्यमयान्न
विंदेरथो अपि बैल्वाः स्युरथो खादिरा अथो पालाशा औदुंबरा एते हि वृक्षा यज्ञियास्तस्मादेतेषां वृक्षाणां भवंतीति वा अ
न्यैः स्युः एवं मध्यममेवाग्रे परिधिं परिदधाति गंधर्वोऽसीति अथ दक्षिणं परिदधातीन्द्रस्य बाहुरसीति अथोत्तरं परिदधा
ति मित्रावरुणौ त्वेति निचक्षतं तानां। पालाशादीनां पूर्वालाभे पूर्वालाभे उत्तरोत्तराणामयं विधिः। पूर्वोक्तावल
ति निविधिनियमः। तेनोत्तरोत्तरोपादाने प्रायश्चित्ताभावः। प्रतिनिधित्वे तु प्रायश्चित्तं भवति। त्रयः परिधयः पा
लाशकार्ष्मर्यखदिरौदुंबरबिल्वरोहीतकविकंकतानां ये वा यज्ञियवृक्षा आर्द्राः शुष्का वा सत्वक्का स्युरिति सोम
ध्यमो पीयान् द्राघीयान् दक्षिणोऽणीयान् ह्रसिष्ठ उत्तर इति उदगग्रं मध्यमं प्रागग्रावितरावित्यापस्तंबः। संध्य
षो मध्यपरिधीनुपदधातीति स एवाह। परिसर्वतो धीयंते स्थाप्यंत इति परिधयः। ततस्त्वयोगिकोऽयं शब्दोऽग्निसंस्का
रनिमित्तो जातिनिमित्तो वा तल्लक्षणमाह कात्यायनः। बाहुमात्राः परिधयः आर्द्राः सत्वचोऽव्रणाः। त्रयो म
वेस्म शीर्णा। आरण्येषां तु वचनादिध्ममिति। ननु परिस्तोमनिधानो त्रयपरिधयस्तु ति नामतः हि चत्वारः स्युः। एतयां मध्य
मदक्षिणोत्तराणि ति त्रयाणामेवोक्तत्वान्न भविष्यंति। एवं सवितियंत्रे हशे वचनं नास्ति तत्र चत्वारो भवंति। यथापि

दर्श॰

त्रमेधेवारण्यान्मपरिध्वोऽन्यपरिधायेध्मनु त्रय एव बाहुस्त्वा मध्यमपरिधाविध्मकृत्वा तत्रयाणां हि मध्यमो भवति। न च तुरंगोपि
तुरागेषपि पूर्वेद्वदिक्ककृतात्। अतो मध्यमा स्थिति रु अव शा अत्रयएवा एतच्च परिधिपरिधानमदृष्टाग्निसंस्कारार्थ
त्वात्र कापि पत्नासु परिधिसमपि भवति। मित्रावरुणौ त्वोत्तरात् परिधत्तामित्येवमूहः। पितृपत्ने इति। कर्काचार्याः
। नेति संप्रदायः॥ ॥ प्रथमं परिधिं समिधोपस्पृश्य वीतिहोत्रमित्यादधाति। इध्मान्तमध्ये होतारो पूर्वसमितः। तया
समिधा नेनैध्म काष्ठेन प्रथमं परिधिमुपस्पृश्य पावित्रेणैव स्पृष्ट्वा तत उत्थाय त्वा होह समिधं वीतिहोत्रमित्यनेन मंत्रेण
हवनीयेऽभ्यादधाति प्रक्षिपति। अथ समिधमभ्यादधाति ह मध्यममेवाग्रे परिधिमुपस्पृशति तेनैतानये समि
धेध्याग्नावभ्यादधाति तेनो अग्निं प्रत्यक्षं समिंधे होऽभ्यादधाति वीतिहोत्रमिति निश्रीतत्त्वात्। उपस्पर्शनं च परिधेः
संस्कारः। परिधिमिति। द्वितीयाश्रवणात्। अतश्च शातरूद्विपेपि भवति आहवनीयेऽभ्याधानं तु दृष्टार्थं तेनो अग्निं
प्रत्यक्षं समिध इति वाक्यशेषात्। अतश्च शातरुद्विपेप्सामिंधनरूपस्पर्शदृष्टार्थस्याभावादभ्याधानाभावः। परिधिरूप
स्पर्शमात्रं कृत्वा समिन्निरस्य नीयेति॥ ॥ अनुपस्पृश्य द्वितीयां। समिदसीति॥ परिधिमनुपस्पृश्यैव इध्माद् द्वि वा
हापाद् द्वितीयां समिधमाहवनीयेऽभ्यादधाति समिदसीत्यनेन मंत्रेण। द्वितीयाग्रहणात्समुपस्पर्शनं निषिध्यते।
अनुपस्पृश्येति। अथ यां द्वितीयां समिधमभ्यादधाति समिदसीति कर्केनं॥ ॥सूर्यस्त्वे तिजपसाहवनीयमीक्षमा

हे॰भा॰ णात्कहूयनत्वात्॥ अध्वर्युरुपविश्याहवनीयमभीक्षमाणः आहवनीयं विलोकयन् स्पृष्टेत्यमुं मंत्रं जपति संहितास्वरे
ण। अथान्याधायजपस्य सृष्टेस्तेति सम्बन्धात्। कुतः एतत्। आहवनीयमभीक्षमाण इति मंत्रस्य तद्वचनत्वात्। आहवनी
यस्याभिधानात्। सूर्यस्त्वेति मंत्रस्य हे अग्ने सूर्यस्त्वा त्वं पुरस्तात्प्राच्यां पातु। अत्र पुरस्ताद्ग्रहणं दिग्वाचकत्वादित्यपञ्चे
सूर्येस्त्वा दक्षिणातः पातित्यूहः। संप्रदायमन्त्रारम्भे त्वनूहः। तदभिप्रायस्तु पुरस्तादूहोग्रवचनो न हियवचनइति। परिधिप
रिधानाद्याहवनीये क्षणाजपान्तमिदमेकं कर्म। एतत्कार्यत्वात्। एकं हि कार्यमग्नेः संस्कारः। परिधयश्चाग्निरक्षणार्था
ः। सूर्येक्षणाजपोपि तदर्थमेव। तत्कुतः। श्रुतेः। गुप्त्यै वा अभितः परिधयो भवन्त्यथैतत्सूर्यमेव पुरस्ताद्गोप्तारं करोतीति
प्रयोजनं। नैमित्तिकं कर्म न भवतीति॥ ॥ आहृत्य वेदिं बर्हिषस्तरणे तिरश्ची निदधाति सवितुर्वइति॥ अध्वर्युर्वेदिमन्त्या
हवनीयसमीपादूर्ध्वदिग्समीपे प्रत्यागप्रस्तरस्यैव बर्हिषो हृतरणे आ रायसवितुर्बाहूस्थइति मंत्रेण वेदिम
ध्ये स्तम्तस्य बर्हिषः उपरि आहवनीयस्य पश्चात्प्रदेशे तिरश्ची मध्ये निदधाति स्थापयति। अर्थस्तीर्णां वेदिमुपा
वर्तनेन हृतरणे आदाय तिरश्ची निदधाति सवितुरित्यादिश्रवणात्॥ आपस्तंबः॥ समावप्रच्छिन्नाग्रौ दर्भौ विधृती कु
रुते इति। तथा अन्तर्वेद्यग्रे निधायेति च तथा अरत्निमात्रे विधृती करोतीति। अपेते कारणे वीयायांतु तस्माद्धृत एम॰
णे आदायेति पठ्यते न बर्हिषस्तरणे इति स्त्रीत्वं। तिरश्ची इत्युक्तत्वाग्रो। अत एव वेदिस्तरणे प्रागग्रैर्बर्हिर्भिः कर्तव्यं। ८

आहृत्य वेदिमित्यवाच्यं। समर्थो देवतस्याग्नेः वाच्यं स्यात्। तद्यानिधानस्य वेद्यधिकरणत्वाभावात्। अन्यथा हि न ज्ञा
यते। केनेतरणे निधीयेते इति॥ ॥ अन्येवायुक्तत्वात्। अत एव वा तरणे आदाय तिरश्ची निधेयेते। न स्तरणस्य बर्हिषस्त
रणे। कुतः। अयुक्तत्वादस्य योरविनियुक्तत्वात्। अन्ये हि अविनियुक्तं बर्हिषस्तरणं वेदिस्तरणे विनियुक्तं। नत्ववि
नियुक्तपावचनं विना अन्यत्र विनियोगो युक्तः। यथा अर्थस्तीर्णायां वेद्यां दृंहतरणे अध्वर्युरादत्ते इति। तस्मादन्यस्य
वतरणं ग्राह्यं। ननु अपि वचनमस्ति कात्यायनानां। अर्थस्तीर्णां वेदिमुपावर्तेते। तस्माद्धृतरणे आदायेति। नहि अ
अपि भवतु वेदितरणयोरेवोपादानं अधिकरणं तु कृत्वा चिंता। वचने सति न्यायस्य दुर्बलत्वात्। न हि न्यायो वचनं बा
धितुमीष्टे। तस्मात् स्वप्रकृते बर्हिषस्तरणे एव आदाय वेद्यां निधेये। तथा च हरिस्वामिनः। अर्थस्तीर्णां वेदिमुपावर्त
न इत्युपावर्तनस्य दृष्टार्थत्वात् कोशदानां वचनस्याद्धृतरणे आदायेति वचनात्तीर्णायामेव वेदे बर्हिषस्तरणे ग्राह्य इति
। ऊहक्रमस्यमनन्त्वा दिशतीति॥ ॥ अन्यत्रापि तरणार्थेषु। अतो यत्रापि पवित्रप्रभृत्यादेः ग्रहणं ग्रहोपस्पर्शनं च पञ्च
णाग्निमंथनादौ तरणार्थे तृणकार्ये प्रसक्ते न द्धाहिर्वान्यान्येव तरणानि ग्राह्याणि। कुतः। युक्तत्वाद्देवायतः। कृतिरेव
विनियुक्तविनियोगपक्षं करोति तस्माद्धृतरणे आदायेति। अर्थस्तीर्णायैवेदिरिति। अतो वचनाभावे अन्यदेव ग्राह्यं
। ननु वेद्येलौकिकमिति वक्ष्यमाणत्वाद्ग्राह्यमेतत्। नहि सामर्थ्येन सर्वार्थतया प्राप्तानामनेनीनां वा चानिकं विनियोगं

इ॰मा॰

विना॰ अस्मिन्कार्ये तेषां निराकरणार्थं इदं वचनं सर्वेकापोथेऽस्य द्रव्यविशेषस्य संनिधानात्प्राप्तस्य निराकरणार्थ विधायमि-
त्यपोनुरुक्तं। अत्र प्रसंगादिदं चिंत्यते। इध्मांजने च सर्पिः किं प्रकृतं स्यात्सांग्रहीतव्यमुताप्रकृतं लौकिकमिति।। किं
तावत्प्राप्तमाज्यस्थानत्वादाज्यं। कुतः प्रकृतौ यावदाज्यकार्यं तत्सर्वं तेन कृतं अतः पशावपि सर्वमाज्यकार्यं तेनैव
कर्तव्यमिति प्राप्ते आह।। ।। इध्मांजने च सर्पिः।। इध्मांजने सर्पिर्घृतं भवत्येव नाज्यं। ननु प्रकृते स्यादाज्यं यद्य-
पि तत्प्रकृतौ वर्तं युक्तमुत्पन्नं तथापि यानि प्रकृताज्यकार्याणि तदर्थमेव। अतः प्रकृतिवत्सर्वाण्यपि तद्वत्तद-
र्थेनैव भवितव्यं न च प्रकृतौ इध्मांजनमस्ति। तस्मिन्वाते राज्यस्याप्याज्यस्य प्रयोजकं। अतो लौकिकमेवोपादा-
यमिध्मांजनं कर्तव्यं। ननु तर्हि विषये लौकिकमित्यनेनैव सिद्धत्वात्सूत्रकृतमिदं। मैवं। न ह्विवाक्यावगतिकार्ये वि-
शेषसंबंधानामग्नीनां तद्व्यतिरिक्तेषु कार्येषु संबंधनिराकरणार्थं। इदं तु प्रकरणावगतकार्ये विशेषसंबं-
धस्य घृतस्य प्राकृतकार्यसंबंधनिराकरणार्थमित्यपोनुरुक्तं।। ।। पुरोडाशपयस्याधानासुवेदन।।
ज्योतिष्टोमे प्रतः पुरोडाशमात्रामैंद्रवायवे प्राप्य तिपयस्यामैत्रावरुणा आमिक्षेनेधानादिति। तत्र पुरोडाशहि-
विरुद्धं प्रकृतायां लिंगाहृतीयात्। इत्युक्तप्रकृतानि लौकिकानीति विकल्पस्य इति केचित्। पितृमेधसूत्रादावेस्तवंव्यो
वक्ष्यते। चशब्दस्तु शब्दस्यार्थे पुरोडाशपयस्याधानासु नु पोप्रकृतानि पात्राणीत्युक्तानेनउपवेदपायस्यात्र

एम॰

अतः अशास्त्रार्थे एवायं यदप्रकृतस्योपादानं कुतः पुरोडाशादिषु द्वितीयादर्शेनात्पुरोडाशादीनामेवायं प्रतिपत्तिरू-
पः संस्कारो न ग्रहणं। प्रतिपत्तिश्च विद्यमानानां कचिदुपयुक्तानां च भवति। न प्रतिपत्त्यर्थमुत्पाद्यते। अपि चा-
वयवश्रवणात्येतानि विद्यमानानां चायत्र गृह्यंते नावयवार्थमुत्पाद्यंते। तस्माद्धि दैवतस्य पात्रेषु प्रतिपादित-
शेषं यजमानेन भक्षयितव्यमिति जैमिनेरप्ययमेव सिद्धांतः। अपन्नयस्त्वेकदेशस्य विद्यमानेऽसंयोगादिति
अत इदं व्याख्यानं युक्तं।। ।। तयोः प्रस्तरं स्तृणात्यूर्णाम्रदसमिति।। तयोरुदगग्रयोस्तीर्णयोर्विधृत्योरुपरिप्रा-
गग्रं प्रस्तरं स्तृणाति ऊर्णाम्रदसमित्यनेन मंत्रेण। तस्मादेव विधृतीनामनंतरं प्रस्तरस्य स्तरणात् ऊर्णाम्रदसमिति
श्रवणात्। अत्र प्रस्तरस्योपगमाधानार्थं जुहूधारणार्थं तत्तत्करणं मंत्रे पितृयज्ञे स्वासस्थं देवपितृभ्य इत्यूहः।। ।।
अभिनिदधात्यात्वा वसव इति।। आत्वा वसव इत्यनेन मंत्रेण अध्वर्युर्द्वाभ्यामपि हस्ताभ्यां प्रस्तरमभिनिदधाति।।
आक्रामति प्रस्तरमभिमुखो पाणी निदधाति। तमभिनिदधात्यातिष्ठतेः। नात्रोदकस्पर्शनं ऊर्णाम्रदसमा-
त्वाग्रहोरेदस्कृतान्मंत्रस्य प्रस्तरो देवतायतनः। आपस्तंबः। तयोः प्रस्तरमभ्यादधाति अभिहृततरणाशी प्रस्तर-
मूलानि बर्हिर्मूलेभ्यो जुहूमसि घृता वीत्येतैर्मंत्रैरनूचीरसंस्पृष्टाः स्रुचः सादयतीति।। ।। स्रुवमाप्यये जुहूं प्रतिगृह्य
निदधाति घृताची इति। अध्वर्युर्जुहूं प्रतिगृह्य प्रतिशब्दादग्नीधासमं पित्रा मा दायहस्याप्युस्य सव्येन हस्तेनाग्रमे-

हे०भा० अविमुक्ते प्रस्तरे निदधाति घृताच्यसि जुहूरित्यनेन मंत्रेण प्रस्तरस्योपरि स्रुग्यामासादयति। अभिनिहितस्रुवसव्ये
नपाणिनाभवन्त्यथदक्षिणेन जुहूं प्रतिगृह्णातीति स वा उपरि जुहूं सादयत्यधस्तराः स्रुचइति श्रुतत्वात्॥ अपि वा जुहू
मेव प्रस्तरे समं मूलैर्जुह्वा दंडं करोतीत्यापस्तंबः। मनुष्व। जुहूं प्रस्तरे सादयति न रिक्ता भवस्यं नतिसमंमूलैर्दंडंक
रोतीति। प्रतिग्रहणं च समर्पणपूर्वकं यतो याम्ये बर्हिः प्रयच्छतीति। श्रुतौ समर्पणे विहिते बर्हिः प्रतिगृह्णातीति स
त्रितं। अतोत्रापि प्रतिगृह्णातीति सूत्रणात् समर्पणपूर्वकमेवोपादानं। घृताचीइति मंत्रस्य यथार्थत्वाज्जुहूमेधी
षषयस्यादावाज्यरहितकेवलस्रुगासादने घृताचीत्यस्यैकस्य पदस्याप्रयोगः। असिजुहूनाम्नेत्येव प्रयोज्यं।
एवं पयस्यायामस्युपभृन्नाम्नेति। प्रकृतावपि प्रागाज्यग्रहणाद्दोहविनाशेपंचशरावादौ क्रियमाणो जुहूपभृ
त्योर्घृतवन्त्योरासादने चैवं ज्ञेयं॥ ॥ एवमितरेउत्तराभ्यां प्रतिमंत्रं बर्हिष्युपभृतं ध्रुवां चावकृष्टेनुपूर्वं॥ इतरे
जुह्वा अन्ये द्वे स्रुचौ बर्हिष्यासादयति। एवमितिप्रतिगृह्य। इतरे उपभृतं ध्रुवां च क्रमेणासादयति अनुपूर्वं अनु
क्रमेणावकृष्टे अपकृष्टे जुह्वपेक्षयाउपभृतमवकृष्टे अपकृष्टदेशे पाद्ध्रुवामवकृष्टामिति। उत्तराभ्यां मंत्राभ्यां
प्रतिमंत्रमेकैकामासादयति। उपभृन्नाम्नेत्युपभृतं। ध्रुवानाम्नेति ध्रुवामिति। एवमेव श्रुतत्वात् आपस्तंबः उत्त एम०
रेणजुहूमुपभृतं प्रतिकृष्टतरामित्याधस्ताद्द्विधृत्योरुत्तरेणोपभृतं ध्रुवां प्रतिकृष्टतरामितोपरिष्टाद्द्विधृत्योरितिरत्न

याद्दक्षिणेन जुहूं स्रुचं सादयत्युत्तरेणावा ध्रुवामिति। मानवे च। अधस्ताद्विधृत्योरुपभृतं। उपरिष्टाद्विधृत्योर्ध्रुवामसंसक्ताः
स्रुचोनूचीः सादयतीति। मंत्रोत्तरविधानाद्बर्हिषीत्यनेन च प्रस्तरे निरासोदेवंशब्देन प्रतिगृह्येत्येतावदेव लभ्यते। तेना
न्यसमर्पितेप्यासादयति। ननु उपभृतं ध्रुवां चेति न वक्तव्यं। इतरे इत्युक्तत्वात्। सत्यं। स्रुचामेवेदमासादनं। न तत्स्थ
स्याज्यस्येति ज्ञापनार्थंपुनरुक्तमित्यदोषः। तत्कुतः। श्रुतौ स्रुचामेवासादनविधानात्। जुहूनीम्नेति जुहूमुपभृन्नाम्ने
त्युपभृतं ध्रुवानाम्नेति ध्रुवामिति। तथा स वा उपरि जुहूं सादयत्यधरतराः स्रुच इति च जुहूर्नाम्नेत्यादिमंत्रलिंगाच्चिंता
याः प्रयोजनं विक्षता बाज्यग्रहणाभावेपि जुह्वादीनामासादनप्राप्तिः जुहूस्थानापन्नानां च शर्पादीके पत्रदोहे नीडुंब
रस्रुवादीनां प्रतिग्रहपूर्वकं प्रस्तरे सादनं भवतीति॥ ॥ पुरोडाशावभिघार्योद्वास्योपस्तीर्णे निधायापामक्रियस्तेप्रा
गाइति॥ ध्रुवासादनानंतरं गार्हपत्यसमीपे गता पुरोडाशावभिघार्योत्तरत उद्वास्य। पूर्वेनतरमुपस्तीर्णे पात्रे निधा
ययस्ते प्रागाद्इति मंत्रेणानक्ति। उपस्तीर्णे इति निधानेनाभूतपूर्वनिर्देशात्पूर्वंतरमुपस्तरणं यत उद्वास्योपस्तरणं कर्तुम
शक्यं पुरोडाशेन रुद्धहस्तत्वात्। एतदभिघारणं द्वाविमौ मंत्रस्य भवति पुरोडाशग्रहणानुपलक्षणार्थं। अत्राहापस्तक
। कपालवत्पुरोडाशादंगारेण योत्स्येति। घृतेत्याग्नेयं पुरोडाशमभिघारयति। तूष्णीमुत्तरं यष्टुं स्यस्त्विति प्रातर्दोहं
स्यानंक्षरइति। पात्र्यामुपस्तीर्णे पर्यावर्तयन्पुरोडाशमुद्वास्य वेदेन प्रमृज्य तस्मिंस्नोद इति पात्र्यां प्रतिष्ठापयति स्रुवेणाक

दे॰भा

पात्राणि भवन्त्यस्य पुरोडाशमनक्ति स्वशक्तिक्रमिति उपरिष्टादभ्यज्याधस्तादुपानक्तीति वा । कपालं वहतीति । वेदेनैनमध्ये
ः । तैत्तिरीयेपि । अथाहवनीयदक्षिणेनाज्यस्थालीं स्रुवं च सव्येन पात्रीं खर्द्दिमित्येतस्मादाय प्रदक्षिणमावृत्य जघ
नेन गार्हपत्यमुपविश्य पात्र्यां द्रुघोपस्तरणीत्येषा नन्तरमिति । अथ ध्रुविमादाय दक्षिणस्य पुरोडाशस्याङ्गारान्नपो
हतीदमहमिति वेदेन विरजसं कृत्वाभिघारयति । अथ ध्रुविमादाय दक्षिणस्य पुरोडाशस्याङ्गारान्नपोहतीदमह
मिति वेदेन विरजसं कृत्वाभिघारयति । अथैनमुद्वासयति उपरिष्टादभ्यज्याधस्तादुपानक्ति । मानवे चाब
देन पुरोडाशभस्मापोहति । वेदोपयामञ्चाज्यस्थाल्याः स्रुवेणाभिघारयति । पात्र्यामुपस्तरणाति उदगुद्वासयति
वेदेनापभस्मानं करोत्यनिघ्नमाणो नावेदशिरसा चेति ततउपस्तीर्णे सादयतीति नोपस्तरणं क्रियापर्यवंत
यन्नधस्तान्चोपनक्तीनाहवलम्नति अस्रुदाहरति हवींषि दक्षिणतो जुह्वाः ध्रुवां स्रुवमासादयत्यग्रेण ध्रुवां
वेदमुत्तरेण ध्रुवामाज्यस्थालीमपरेणाकन्देशात् पात्रीं दक्षिणस्यां वेदिश्रोण्यां सायंदोहमुत्तरस्यां प्रातर्दोहमिति
। काठके च । अन्तो पुरोडाशौ वेदेन सम्मस्पालंकृत्य पात्र्यां सादयति यानि घर्मे इति कपालानि विमुञ्चति विमोचनेनैते राम॰
नोहेदूवीप्पद्गावेयां सादयति श्रोण्योर्दोहौ दक्षिणस्यां सायंदोहमुपभरति प्रस्तरे श्रुचं दक्षिणास्ककंभरति । त
तोऽत्रापक्रमः । प्रथमं वेदेन पुरोडाशविभस्मीकरणं ततः पात्र्योपस्थापनं । ततः पुरोडाशपार्श्वाभिघारः । ततः पात्र्यामुपस्ता

रणं । तत उदगुद्वासनं । वेदेन पुनर्विरजस्करणं । ततः स्थापनं पात्र्याः उपरि । ततः प्राणादानमिति । अस्मिन्मंत्रे यजमा
नाभ्यां विंदेति द्वियजमानके ऊहः । स्वर्यजमानेभ्यो विंदेति बहुयजमानके ॥ ॥ यथादेवतमभ्यूत् । अञ्जनमंत्रे ग्नि
गच्छत्यस्य स्थाने यथादेवतमग्योऽयपस्य इह द्विषोपादेवतातास्मिन्नूह विषित्तदेवता वा चिपदं द्वितीयान्तं संप्रयोज्यमित्यर्थः ।
तद्यथा अग्नीषोमीये पुरोडाशे अग्नीषोमौ गच्छेति । सेहपोरिंद्रं गच्छेति । एवं सर्वत्र ॥ ॥ भस्मभक्ति कपालानि यानि घर्मे इ
ति ॥ यानि घर्मे इति मंत्रेण स्रुवेणाक पालानि प्रत्यनक्ति । अञ्जनं च प्रत्येकमुपधानक्रमेण कार्यं । युगपत्कर्तुमशक्यत्वात् । प्र
तिकपालं च मंत्रप्रयोगः । बहुवचनं तु इज्यार्थं अतएव विकृतौ एककपाले द्विकपाले च नोहः ॥ प्रकृतावसमवेतत्वात् ॥ ॥
तद्धर्मो वा ॥ अथवा तस्मै मंत्रविनियोगः सर्वान्तरात् स्रुवेणैव प्रत्येकमुपधानक्रमेणैव कपालान्यनक्ति । तथा ह्यापस्तम्बः
। स्रुवेण कपालानि प्रत्यनक्तीति ॥ ॥ संख्याय उद्वासयति ॥ संख्याया संख्यावाचिना पूरणप्रत्ययान्तेन शब्देन मंत्रभूतेन प्र
थमं द्वितीयं तृतीयमित्येवं गणयन्नुपधानक्रमेणैव कपालान्युद्वासयति प्रथममुद्वासयामि द्वितीयमुद्वासयामीत्ये
वं यावत्कपालं प्रयोगः । विकृतौ कपेरस्यापि कपालस्यानीपस्यांजनोद्वासने भवतः ॥ ॥ प्रियेणधाम्नेति हवींषि विवे
घां कृत्वा ध्रुवा असदन्निति सर्वाण्यालभते ॥ प्रियेणधाम्नेत्यनेन मंत्रेणाज्यस्थालीपुरोडाशादीनि हवींषि क्रमेणा
वेधां कृत्वानुदकंस्थानि ध्रुवा याया उत्तरतो वेधामासाद्य ध्रुवा असदन्निति मंत्रेण तानि सर्वाणि हवींष्यालभते उपयामक

५८

दे॰भा॰

मेण। तेन प्रथममाज्यस्या आज्यस्य ततो जुहूपभृद्ध्रुवास्थस्याज्यस्य। ततः पुरोडाशा। हवींषि। पाहि यज्ञं तं पत्नीति हविर्यजमानके।
। पाहि यज्ञन्यतीनि वहू यजमानके चोहः। आपस्तंबः। अपरेणास्रुचः पुरोडाशावासादयत्स्रुक्त्वरौ दोहं च विषामध्ये वेधाः
सान्नाय्यकुंभ्यौ संदधाति पूर्वेध्मपरं दध्यथैनं प्युदूहति दक्षिणाश्रोणापांमृतमासादयत्युत्तरस्यां दधीति। तथा। अग्रेणो
त्तरेणा वा ध्रुवां वेदं निधाय वेद्यंतान्स्तरिरतो पेहोत्सपदनं कृत्य यित्वाहामिधेनीभ्यः प्रतिपद्यत इति। विहृतावप्युपयो
गक्रमेणैव हविषामालंभनं। तेन ध्रौवालंभनोत्तरं पृषदाज्यालंभनं पशौ कार्यं॥ ॥पाहि मामित्यात्मानं॥ हविषामा
लंभानंतरं पाहि मां यज्ञन्यमित्यनेन मंत्रेणाध्वर्युरात्मानमालभते। तृणपदेशं हस्तेन स्पृशति। ततोपनुपस्पृशतिर्वा
आत्मानमालभ्य उपस्पृशेदिति परिभाषितत्वात्। स्वचायमालंभ आत्मसंस्कारः करिष्यमाणकर्मार्थ आराद्दुपका
रः। न तस्य पशौ सुत्यायां च पुनः उनहे विशासादने कृते न भवती प्रथमतस्य सकृत्कृतेनात्मनः कर्मसमाप्तिपर्यंतं सं
स्कृतत्वादिति। अग्न्यमेधे च प्रथमे हूनि संस्थिते सर्वराच सध्ययोरग्निहोमो विहितः सं स्थिते ग्निष्टोमे परिहृतासु वस
तीवरीष्वध्वर्युरग्निहोमं जुहोतीति। तत्र च्छविरोधान्मध्यमाहः संबध्यापररात्रिं वा मे सर्वप्रतिप्रस्थाताकरोतीति। तत्र च प्र
तिप्रस्थात्रा अपररात्रे सवनीये पशु तंत्रस्य आसासादनालंभांते कृते ध्वर्युरग्निहोमं कुर्वन्न वात्मालंभनं करोति। तस्य
करिष्यमाणकर्मार्थत्वादिति॥ ॥अत्र वा व्रतोपायनमत्र वा व्रतोपायनं। अत्रामिन्नेव सरे वा व्रतोपायनं व्रतग्रहणं भवति

राम॰

५८

५९

दे॰भा

शाखांतरगत। द्विरभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः ८ ॥ ॥महायाज्ञिकदेवदत्तकृते कात्यायनसूत्रवृत्तौ द्वितीयोऽध्यायः स
माप्तः॥ ॥संवत १८३३ मीतिकार्तिकवदि १४ वारशनिचर॥ ॥ श्रीविस्नुशहाय॥ ॥ ॥ ॥ ॥॥

राम॰

देव याज्ञिकभाष्य

II

```
[OrderDescription]
,CREATED=24.07.19 11:45
,TRANSFERRED=2019/07/24 at 12:16:30
,PAGES=73
,TYPE=STD
,NAME=S0001099
,Book Name=M-1951-KATYAYAN SUTRA BHASYSAHITAM DYUTOADHYAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
```

```
,FILE35=0
,FILE36=0
,FILE37=0
,FILE38=0
```

,FILE39=0

,FILE40=0

,FILE41=0

```
FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,
```